।। श्री गणेशाय नमः ।। श्री सरस्वत्यै नमः ।।
।। श्री गुरुभ्यो नमः ।।

सङ्कल्प सङ्ग्रह

आणि

सूक्त संग्रह, माहिती संग्रह

भाग १ ते ३

ॐ

।।।

: संपादक :

काव्यतीर्थ श्री. वि. के. वैशंपायन गुरुजी, मालाड

(महाराष्ट्र राज्य महाकवी कालीदास संस्कृत साधना पुरस्कार -२००१ ने सन्मानित झालेले)

: प्रकाशक : **प्रोग्रेसिव्ह पब्लिकेशन (धार्मिक प्रकाशन)**

नारायण निवास, ९९ भवानी शंकर रोड, डॉ. नारायण कु. जोशी मार्ग, दादर (प.) मुंबई - ४०० ०२८

: संकलक :
काव्यतीर्थ श्री. वि. के. वैशंपायन गुरूजी
द्वारा - *म. वि. वैशंपायन*
१०१, श्रीनिवास, दुर्गा लेन,
मंगलमूर्ती बिल्डींग जवळ,
लिबर्टी गार्डन रोड नं. १,
मालाड (प.), मुंबई - ४०० ०६४.
दूरध्वनी : २८८१ ९६०६

●

प्रकाशक :
श्री. सुरेश नारायण जोशी
प्रोग्रेसिव्ह पब्लिकेशन्स
नारायण निवास, ९९ भवानी शंकर रोड,
डॉ. नारायण कुं. जोशी मार्ग, दादर (प.), मुंबई - ४०० ०२८.
दूरध्वनी : २४२२ ११६० / २४३६ ०६४४

● सर्व हक्क प्रकाशकाच्या स्वाधीन. ●

आवृत्ती पहिली :
श्रावण शु. १५, शके १९३३ (रक्षाबंधन)
शनिवार दिनांक १३ ऑगस्ट २०११

●

मूल्य १०१/- रूपये मात्र

●

मुद्रक :
श्री. विशाल विजय मोरे
स्क्रिनएज, ५५६/२, गणेश वाडी, सेनापती बापट मार्ग, दादर, मुंबई - ४०० ०२८.
मोबाईल : ९८२१४५७२३४

।।नमामि श्रीगौरीहरतनयपादौहि शिरसा।। अतिरुद्रादिकांच्या परिभाषा

(विचार) (संख्या)	फळ
१ रुद्राचे अकरा नमक व ११ चमक क्रमश: एकदा म्हटले की रुद्राचे एक आवर्तन होते.	१ गंगास्नान
२ नमकाचे ११ अनुवाक व चमकाचा १, १, असे ११ अनुवाक म्हटले की, रुद्री (रुद्रैकादशनी) होते.	२ भयंकर पापांचा नायनाट होतो.
३ रुद्राची एकादशनी ११ वेळा केली म्हणजे एक लघुरुद्र होतो.	३ अकाली यमदर्शन घडत नाही.
४ ११ लघुरुद्र केले म्हणजे एक महारुद्र होतो.	४ महापातकांचा नाश होतो. दरिद्री मानवाला द्रव्यप्राप्ती होते.
५ ११ महारुद्र केले म्हणजे एक अतिरुद्र होतो.	५ अत्युच्च कोटीच्या पापांचा नाश होतो.

रुद्राच्या नमकात ११ अनुवाक आहेत. त्या प्रत्येकाचे फळ

अनुवाक १) जपकरुन विभूति व तीर्थ घेतल्याने साधकास मनात - ध्यानात शिवदर्शन होते.

अनुवाक २) अभ्युदय होतो.

अनुवाक ३) मन:शांतीमिळते.

अनुवाक ४) लढण्याचे सामर्थ्य येते.

अनुवाक ५) संततीप्राप्तीसाठी.

अनुवाक ६) मानसन्मान मिळतो, श्रेष्ठत्व येते.

अनुवाक ७) प्रसिध्दि मिळते.

अनुवाक ८) शिवानुग्रह.

अनुवाक ९) सुखप्राप्ति होते.

अनुवाक १०) सौम्यस्वरुपात देवदर्शन.

अनुवाक ११) सर्व संकटातून मुक्तता होते.

एकादशनी केल्यास वरील सर्व फळे मिळतात.

रुद्राभिषेकाचे पदार्थ (वस्तु) आणि त्याचे फळ

१ शुध्द जलाभिषेक -	पाऊस पडण्यासाठी
२ कुशोदक (दर्भ घातलेले पाणी) -	व्याधि नाशनासाठी
३ दही -	गोधनादि प्राप्तीसाठी
४ उसाचा रस -	लक्ष्मी प्राप्तीसाठी
५ मध किंवा तूप -	धन प्राप्तीसाठी
६ पुण्यतीर्थोदक -	मोक्षप्राप्तीसाठी
७ गाईचे दुध/साखरमिश्रित पाणी -	पुत्रप्राप्तीसाठी
८ कर्पूरमिश्रित पाणी -	ज्वर निवारण्यासाठी
९ तुपाचा अभिषेक -	वंशविस्तारासाठी
१० साखरमिश्रित दूध -	बुध्दिमान होण्यासाठी
११ तेलाचा अभिषेक -	शत्रुनाशनासाठी
१२ मधाचा अभिषेक -	क्षयनाश, पाप, व्याधि नाश

१३ चंदनादि, अष्टगंधमिश्रित पाणी- शिवाला/देवाला-शांतकरण्यासाठी
विशेष रानरेडयाच्या (गवा) शिंगाने शिवावर अभिषेक करावा.

लघुरुद्र, महारुद्र, अतिरुद्र करण्याची काही कारणे -
आपत्तींच्या नाशासाठी, कायिक, वाचिक, मानसिक, मतभेद दूर होण्यासाठी, भारतीय संस्कृतिविषयी प्रेम / निष्ठा उत्पन्न होण्यासाठी, देशात शांतता नांदण्यासाठी, या जन्मातील सर्व प्रकारे उत्कर्ष साधण्यासाठी, धान्याची नासधूस टाळण्यासाठी, सांथीचे रोग, करणी, जारण, मारण, बंधन, यातून मुक्त होण्यासाठी, रुद्रदेवतेच्या कृपाप्रसादासाठी, श्रध्देच्या स्थैर्यासाठी, सर्वारिष्टनिरसन होण्यासाठी, मनसेप्सित कार्यपूर्तीसाठी, इत्यादी कारणांसाठी, लघुरुद्रादि कार्य करावे.

श्री गणेशाय नमः। **(लघुरुद्र विशेष संकल्प)**

श्री मन्महागणाधिपतये नमः। कुलस्वामी कुलदेवताभ्यो नमः। ग्रामदेवता, क्षेत्रपाल, वास्तुदेवताभ्यो नमः। सुमुखश्चैक ---- श्रीमद्भगवतो ------ एवंगुण विशेषण, विशिष्टायां, शुभपुण्य तिथौ, अमुक गोत्रोत्पन्नः, अमुक नक्षत्रे, उत्पन्नः, अमुक - लग्न, अमुक राशौ जातः, अमुक शर्मा अहं, तथाच मम भार्यायाः अमुक नक्षत्रे, उत्पन्नायाः, अमुक लग्नस्य, अमुक राश्यंतर्गत, अमुक नाम्न्याः, मम भार्यायाःच, भवानीशंकर महारुद्रदेवता, प्रीत्यर्थं, आवयोः, तथा सर्वेषां सहकुटुंबानां, क्षेम स्थैर्य, विजय, जय, शत्रोःअभय, आनंद, आयुः, आयुष्य, आरोग्य, ऐश्वर्यादि अभिवृध्द्यर्थं, धर्म, अर्थ, काम, मोक्षांत चतुर्विध पुरुषार्थफल प्राप्त्यर्थं, तथाच मम (आवयोः) इहजन्मनि, अन्यजन्मनि, जन्मजन्मांतरेषु, बाल्य, कौमार, यौवन, वार्ध्दक्य, अवस्थासु, ज्ञानतः, अज्ञानतः, मयाकृत, पापदोषवशात्, जन्मकाले, सूचित समस्तग्रहपीडा, गृहचारपीडा, क्रूरग्रहादिदोष, परिहारार्थं भौम, अंतरिक्ष, दिवि, महोत्पात, दुःस्वप्न, दुःशकुन, नानाविध, अरिष्टपीडापरिहारपूर्वक, सन्मंगलादि, अभिवृध्द्यर्थं, कुटुंबेस्थित,ज्ञात अज्ञात, समस्त भूत, प्रेत, पैशाच, यक्ष, यमदूत, शाकिनी, डाकिनी, सर्पशापवशात्. समस्तप्रतिबंधकारकदोषादि, निवारणार्थं, गृहेउद्योगेषु च कुलदेवता, ग्रहदेवता, रुद्रदेवता अनुग्रहेण धनलक्ष्मी, धान्यलक्ष्मी, संतानलक्ष्मी, कारुण्यलक्ष्मी, सौभाग्यादिलक्ष्मीनां, स्थिरतः निवाससिध्द्यर्थं,च, क्रूरदशा, अंतर्दशा, विदशा, सूक्ष्मदशा, उडूदशामार्गेण, सूचित समस्त, अपमृत्यु, ध्रुवमृत्यु, महामृत्यु, पीडा परिहारार्थं, सारोग्य दीर्घायुःविपुलधन, पुत्र, पौत्र, अनवच्छिन्नसंतति, कीर्तिलाभादि, अभिवृध्द्यर्थं, अद्य दिवसे, संकल्पित ब्राह्मणव्दारा/ ब्राह्मणैसह जप, हवन, तर्पण, मार्जन, भोजनइति पंचांग विधिपूर्वक

भवनीशंकर महारुद्र देवताप्रीत्यर्थं, लघुरुद्राभिषेकाख्यं कर्म स्थापन पूजनादिकंच, अद्यैव करिष्ये। निर्विघ्नार्थं महागणपतिपूजनं, मंगलार्थं स्वस्तिपुण्याहवाचनं, हिंसानिवारणार्थं मातृकापूजनं, कर्मसमृध्द्यर्थं, नांदीश्राध्दं, तथाच आचार्य, ब्राह्मणवरणादि करिष्ये। (तथाच संकल्पित रुद्रांगं हवनादि करिष्ये।

संकल्प २ - लघुरुद्र - महारुद्र

कर्ता - यजमान:

आचम्य पवित्र पाणि:प्राणायामं कृत्वा गणपति कुलदेवतानां फलतांबूलं समर्प्य वृध्दान्, ब्राह्मणान् नमस्कृत्य.

श्रीमन्महागणाधिपतये नम: श्रुतिस्मृति ० संकल्प अमुक गोत्रोत्पन्न: अमुक शर्मा अहं - अस्माकं सकल कुटुंबीयानां आयुरारोग्य ऐश्वर्यादि अभिवृध्द्यर्थं कायिक, वाचिक, मानसिक दौर्बल्य, निरसन पूर्वक, उत्पन्न उत्पत्स्यमानस्यच कफवातपित्तादीनां प्रकोपात् जायमाना, विविध पीडा परिहारार्थं, संकल्पित कार्ये, व्यवहारे च सर्वविध उपद्रव, पीडा परिहार्थं, शारीरिक मासिक, वाचिक सुख प्राप्तये, धनधान्य समृध्दिपूर्वक अप्राप्तलक्ष्मी प्राप्तये, प्राप्तलक्ष्म्या: स्थिरता प्राप्तिपूर्वक आदित्यादि नवग्रहणां अनिष्ट स्थाने स्थितानां ग्रहाणां इष्टफल प्राप्तये, श्रीभवानीशंकर महारुद्र देवता प्रीत्यर्थं लघुरुद्र (स्वाहाकारानुष्ठानात् प्राक्त्रिदिनात्मक) महारुद्राभिषेकाख्यं कर्म ब्राह्मणव्दारा करिष्ये।

निर्विघ्नता सिध्द्यर्थं महागणपति पूजन स्वस्तिपुण्याहवाचनं तथाच अद्य संकल्पित महारुद्रांगभूतं जलधारया लघुरुद्र त्रयं, करिष्ये तथाच भवानीशंकर महारुद्र देवताया: षोडशोपचारे, पूजनं करिष्ये।

।।श्री महारुद्र / अतिरुद्र विशेष संकल्प

श्री गणेशाय नमः। ओम् नमः शिवाय

वागर्थाविव संपृक्तौ वागर्थ प्रतिपत्तये।
जगतः पितरौ वंदे पार्वती परमेश्वरौ।।१।।

आचम्य पवित्र पाणिः, श्रीमन्महागणाधिपतये नमः। सुमुखश्चैकदंतश्च ------ तिथिर्विष्णुः ---------- जगत्। एवंगुण विशेषण विशिष्टायां शुभपुण्यतिथौ - अमुक गोत्रोत्पन्नः अस्मिन् संकल्पित कर्मणि सर्वेषाम् कुटुंबीयानां, प्रतिनिधित्वेन, उपस्थितः, अमुक शर्मा अहं,

मम सहकुटुंबस्य, जन्मप्रभृति, एतावत् कालपर्यंतं, बाल्य, कौमार, यौवन, वार्धक्ये च, जागृति, स्वप्न, सुषुप्ति - अवस्थासु, काम, क्रोध, लोभ, मोह, मद, मात्सर्य, आदिभिः मनोव्यापारैः, श्रवण, स्पर्शन, दर्शन, रसना, घ्राणैः, श्रोत्र, त्वक्, चक्षुः, जिह्वा, नासिका आदि, ज्ञानेंद्रिय- व्यापारैः वचन, आदान, उत्सर्ग, वाक्, पाणि, पाद, पायुउपस्थ आदि कर्मेंद्रिय व्यापारैः, संभावितानां, ब्रह्महत्या, सुरापान, स्वर्णस्तेय, गुरुतल्पगमन, तत्संसर्गाख्य, पंचमहापातकानां, गर्भ हनन, गोवध, शिवलिंगचालन, आदिनां अतिपातकानां. गुरुअधिक्षेप, वेदनिंदा, नर, अश्व, रजत, भूमि, वज्र, मणि, स्त्रीवध, शतपल ताम्र निक्षेप, हरणादीनां, समपातकानां, मातृ, पितृ गुरु त्याग, तडाग, आराम विक्रय, आत्मार्थं पाकक्रय, सदापरान्नभोजन, अशास्त्रअभ्यास, परवृत्ति छेदनादि उपपातकानां, खरादि, महिषीवधांत संकली करणानां, कृमि, कीटक, पक्षि, जलचर, वध, फलकाष्ठ, कुसुमस्तेयादि मलिनीकरणांनां, निंदितधन आदान, कुसीदजीवन, असत्यभाषणादीनां, अपात्रीकरणानां, मद्यादि, अनाघ्रेय, अपेय,

पदार्थानां, प्राशनेन, जातिभ्रंश कराणां, नग्नस्नान, जनकादीनांकृते एकवचनांत प्रयोग, अस्नात भोजनादीनां, प्रकीर्णानां, एवं विविध पातकानां, सकृत्, असकृत कृतानां, पापानां, अपनोदार्थं, तथाच मम सकुटुंबस्य, जन्म नक्षत्र, नाम नक्षत्र, जन्मराशि, नामराशि, जन्म, अनुजन्म, त्रिजन्म, होरा, द्रेष्काण, नवांश, व्दादशांश, त्रिंशांश, षष्ठ्यंश, भावांश, अष्टकवर्ग चक्रवशात्, सामुदायिक, ग्रह, उपग्रह, भावग्रह, अरिष्टग्रह, मारकग्रह, क्रूरग्रह, क्षांतिग्रह, क्षणिकग्रह, अर्घ, पाददृष्टि, षट्‌वर्गज, रुप, देह, भावजवशात्, अष्टम, नीचस्थान, स्थितानां, धूमकेतू, आदि उपग्रह स्थितानां, आदित्यादि नवग्रहाणां-मध्ये, दुष्टग्रहयोगादि, प्रयुक्त, पापयुक्ताः, ग्रहाः, तेषां, आनुकूल्यार्थं, कायिक, वाचिक, मानसिक, कौटुंबिक, सुखवृध्दिकामः, शुभस्थानस्थितानां, निसर्गतः शुभराजयोगादि, लाभप्रद, शुभग्रहाणां, शुभ फलप्राप्तये, प्रारब्धकर्मवशात्, प्राप्तानां परकृत क्रियमाण, करिष्यमाण, सकल मंत्र, तंत्र, यंत्र, विषचूर्ण, अभिचार कृत्य, अंजनादि, प्रेरित, तापत्रय निवृत्तिव्दारा, आयुरारोग्य, प्राप्त्यर्थं मनःप्रसाद, कुटुंबवृध्दि, परमस्वास्थ्यादि सिध्द्यर्थं,चतुर्वेदसारभूतानां, पंचाक्षरमहामंत्र, आगर्भितानां, श्रीरुद्रमंत्राणां(रुद्रस्य,) जलधारया / दुग्धधारया, एभिःब्राह्मणैसह आचार्योपदिष्ट, सर्व प्रायश्चित्तकर, महारुद्र / अतिरुद्र अभिषेकाख्यं कर्म करिष्ये। निर्विघ्नार्थं महागणपतिपूजनं, मंगलार्थं स्वस्तिपुण्याहवाचनं हिंसानिवरणार्थं मातृकापूजनं, कर्मसमृध्द्यर्थं, नांदीश्राध्दं, संकल्पितकार्य संपादनार्थं आचार्यवरणं करिष्ये। ब्राह्मणवरणंकरिष्ये। शरीरशुध्द्यर्थं महान्यासं करिष्ये। तथाच भगवतःशंकरस्य षोडशोपचारपूजनं करिष्ये। इच्छाचेत् दशांश हवनाख्यं कर्म करिष्ये।

संकल्प १ सामूहिक उदकशांति - सार्वजनिक लघुरुद्र-महारुद्र

आचम्य पवित्रपाणि: श्रीमन्महागणाधिपतये नम: ------------

अद्य ब्रह्मणो व्दितीय परार्धे विष्णुपदे श्री श्वेतवाराहकल्पे वैवस्वत मन्वंतरे. अष्टाविंशतितमे युगचतुष्के कलियुगे प्रथमचरणे जंबुव्दीपे भरतवर्षे दक्षिणापथे रामक्षेत्रे बौध्दावतारे. दंडकारण्ये देशे गोदावर्या: दक्षिणदिग्भागे शालिवाहनशके वर्तमान व्यावहारिके --- नाम संवत्सरे. दक्षिण/उत्तर अयणे,-- ऋतौ-- मासे--पक्षे-- तिथौ.-- वासरे.-- दिवसनक्षत्रे-- स्थितेवर्तमाने चंद्रे-- स्थिते श्रीसूर्ये --- देवगुरौ शेषेषु ग्रहेषु.

यथा यथा राशिस्थानस्थितेषु सत्सु-- नामयोगे-- करणे अेवंगुण विशेषण विशिष्टायां शुभपुण्यतिथौ.-- मम आत्मन:-- श्रुतिस्मृतिपुराणोक्त। फलप्राप्त्यर्थं श्रीपरमेश्वर प्रीत्यर्थं--- गोत्रोत्पन्न: --- शर्मा अहं अस्माकं/मम अमुकनाम संस्थाया:

मम संस्थाया: कार्यकारीमंडल परिवार अंतर्गत प्रतिनिधित्वेननियुक्त: अहं --- देवताया: भजक, लघु महाजन समेतस्य मम कुलदेवता इष्टस्वाथ्यादि गुर्वादिदेवता ब्राह्मण देवता कृपा प्रसादेन जन्म जन्मार्जित शरीर वाड्मन: संभूत अेनो निबर्हणेन दिव्य भौम अंतरिक्ष उत्पात सकलजन्य सकलअरिष्ट परिहारार्थं इदानीं मम जन्मराशे:/संस्थाया: सकाशात् अनिष्ट स्थानगता: सूर्यादि ग्रहदशा महादशा अतंर्दशा सूचितकफवात पित्तोभ्दूत विविधश्लेष्मज्वर कास श्वास प्लेहादि विविध रोग बाधा निरासार्थं तथा अस्यवास्तो: प्रजातांना भूतप्रेत पिशाचादि अवगतिकादि संबंध स्वरुपेण कुलोत्कर्ष प्रतिबंधकांना जीवात्मनां सुगतिप्राप्त्या. तथा पर प्रयुक्त अभिचारादि कर्मवशात् संक्षोभित यद्राक्षसादि क्षुद्र देवता प्रयुक्त दु:स्वप्न दु:शकुन अपशकुनादि आधिव्याधि सर्व बाधा निरसनार्थं राग मोह

लोभ वशात् आचरितानां देव -- व्दिज -- पितृगणानां रोष परिहारार्थं, इष्टस्थान, कुलस्थान, ग्रामस्थान, वास्तुक्षेत्रदेवता, अपराधवशात्, संप्राप्त, अतिवृष्टि अनावृष्टि भूतक शलभादि इतिबाधा जनमार, पशुमार, परस्पर कलह, ऋण, रोग, दारिद्रय, अपमृत्यु महामृत्यु शत्रुजन्यप्रयुक्त उक्तानुक्त सर्वारिष्ट परिहारव्दारा (लघुरुद्र महारुद्र आदि कार्यानुसार शब्द योजावेत) श्रीषंडगसहित वेदपुरुषब्रह्म कृपाप्रसाद सिध्यर्थं तत्कृपाप्रसादेन सर्वापन्निवृतिपूर्वकं सर्वाभीष्ट फलप्रप्त्यर्थं - मम च सर्वेषां सभासदानाम् सकुटुंबानां सपरिवाराणां. सहाय्यकर्तृणां आप्तजनानां. हितचिंतकाना आय व्ययादि दोषपरिहारार्थं समस्त मित्रपरिवारादि बंधुवर्गाणां. - शरीरे उत्पत्स्यमान कफवात पित्त त्रिदोष अन्यतम, अन्यतमप्रकोप उद्भूतज्वरादि विविध व्याधेः जीवत्शरीर अविरोधेन समूल निवृत्या क्षिप्रआरोग्य. प्राप्त्यर्थं ग्रह भूत प्रेत पिशाच क्षुद्रदेवता सिध्द अभिशापादि विविध उपद्रव शांत्यर्थं सर्वापत् निवृत्ति पूर्वक अभीष्ट फल प्राप्त्यर्थं अस्यवास्तोः शुभता प्राप्त्यर्थं श्री षडंगसहित वेदपुरुष ब्रह्मप्रीत्यर्थं ब्राह्मणव्दारा अेकाहपक्षमाश्रित्य बौधायनोक्तां उदकशांतिं करिष्ये।

तदंगं निर्विघ्नता सिध्दयर्थं माहागणपतिपूजनं, मंगलार्थं स्वास्तिपुण्याहवाचनं, हिंसानिवारणार्थं मातृका पूजनं. कर्मसमृध्द्यर्थं नांदीश्राध्दं यागनिष्पत्यर्थं / कार्यनिष्पत्यर्थं आचार्य ब्राह्मण वरणंच करिष्ये - या कार्यक्रमाचे वेळी सामूहिक नांदीश्राध्द करावे.

सामूहिक कार्याचेवेळी करावयाचे नांदीश्राध्द (दूर्वापवित्रके धृत्वा)

श्री गणेशाय नमः ।। (सर्वत्र देवतीर्थेन, सव्येन च कार्यम्)

उपचार - पाद्य, गंधाक्षत व युग्मब्राह्मण भोजन पर्याप्त द्रव्य

पाद्य ----

१) क्रतुदक्षसंज्ञकाः विश्वेदेवाः नांदीमुखाः भूर्भुवः सुवः
इदं वः पाद्यं स्वाहा नम इयं च वृध्दिः ।

२) अग्निष्वाताः पितृगणाःनांदीमुखाः भूर्भुवः सुवः,
इदं वः पाद्यं स्वाहा नम इयं च वृध्दिः ।

३) बर्हिदः पितृगणाः नांदीमुखाः, भूर्भुवः सुवः,
इदं वः पाद्यं स्वाहा नम इयं च वृध्दिः ।

४) आज्यपाः पितृगणाः नांदीमुखाः भूर्भुवः सुवः
इदं वः पाद्यं स्वाहा नम इयं च वृध्दिः ।

५) सोमपाः पितृगणाः नांदीमुखाः भूर्भुवः सुवः
इदं वः पाद्यं स्वाहा नम इयं च वृध्दिः ।

आसनगंधादि - उपचार

१) क्रतुदक्षसंज्ञकाः विश्वेदेवाः नांदीमुखाः भूर्भुवः सुवः
इदंवःआसनगंधाद्युपचारकल्पनं, स्वाहा नम इयं च वृध्दिः ।

२) अग्निष्वाताः पितृगणाः नांदीमुखाः भूर्भुवः सुवः,
इदंवःआसनगंधाद्युपचारकल्पनं, स्वाहा नम इयं च वृध्दिः ।

३) बर्हिदः पितृगणाः नांदीमुखाः, भूर्भुवः सुवः,
इदंवःआसनगंधाद्युपचारकल्पनं, स्वाहा नम इयं च वृध्दिः ।

४) आज्यपाः पितृगणाः नांदीमुखाः भूर्भुवः सुवः
इदंवःआसनगंधाद्युपचारकल्पनं, स्वाहा नम इयं च वृध्दिः ।

५)   सोमपा: पितृगणा: नांदीमुखा: भूर्भुव: सुव:
इदंव:आसनगंधाद्युपचारकल्पनं, स्वाहा नम इयं च वृध्दि: ।

युग्म ब्राह्मणभोजन पर्याप्त द्रव्य

१) गौर्यादि षोडशमातर:, ब्राह्म्यादिसप्तमातर:,
गणपत्याद्या: चत्वार:, भूर्भुव: सुव:,
इदं व: युग्मब्राह्मणभोजनपर्याप्तं आमनिष्क्रयीभूतं, किंचित्
व्यावहारिकं द्रव्यं, स्वाहा नम: इयं च वृध्दि: ।

२) क्रतुदक्षसंज्ञका: विश्वेदेवा: नांदीमुखा: भूर्भुव: सुव:
इदं व: युग्मब्राह्मणभोजनपर्याप्तं आमनिष्क्रयीभूतं, किंचित्
व्यावहारिकं द्रव्यं, स्वाहा नम: इयं च वृध्दि: ।

३) अग्निष्वाता: पितृगणा:नांदीमुखा: भूर्भुव: सुव:
इदं व: युग्मब्राह्मणभोजनपर्याप्तं आपनिष्क्रयीभूतं, किंचित्
व्यावहारिकं द्रव्यं, स्वाहा नम: इयं च वृध्दि: ।

४) बर्हिद: पितृगणा: नांदीमुखा:, भूर्भुव: सुव:
इदं व: युग्मब्राह्मणभोजनपर्याप्तं आमनिष्क्रयीभूतं, किंचित्
व्यावहारिकं द्रव्यं, स्वाहा नम: इयं च वृध्दि: ।

५) आज्यपा: पितृगणा: नांदीमुखा: भूर्भुव: सुव:
इदं व: युग्मब्राह्मणभोजनपर्याप्तं आमनिष्क्रयीभूतं, किंचित्
व्यावहारिकं द्रव्यं, स्वाहा नम: इयं च वृध्दि: ।

६) सोमपा: पितृगणा: नांदीमुखा: । भूर्भुव: सुव:
इदं व: युग्मब्राह्मणभोजनपर्याप्तं आमनिष्क्रयीभूतं, किंचित्
व्यावहारिकं द्रव्यं, स्वाहा नम: इयं च वृध्दि: ।

नांदीश्राध्दस्य सांगता -

(द्राक्ष, आवळे किंवा उपलब्ध फळे व द्रव्य यांसह गुरुजींनी सांगितल्यावर उदक व वस्तू सोडाव्यात)

ओम् उपास्मैगायता नर: पवमानायेंदवे। अभिदेवां इयक्षते। अभितेमधुनापयोथर्वाणो आशिश्रयु:। देवं देवाय देवयु।। सन: पवस्वशंगवेशंजनायशमर्वते। शंराजन्नोषधीभ्य:।। बभ्रवेनुस्वतवसेरुणाय दिविस्पृशे। सोमाय गाथमर्चता।। हस्तच्युतेभिरद्रीभि: सुतं सोमं पुनीतन। मधावाधावता मधु कृतस्य नांदीश्राध्दस्य प्रतिष्ठाफलसिध्द्यर्थं, द्राक्षामलकानि, तन्निष्क्रयीभूतं वा यथाशक्ति हिरण्यं दक्षिणात्वेनस्वाहा, नम: इयं च वृध्दि:।

ओम् प्रजापतेनत्वद्रेतान्यन्योविश्वाजातानि परिताबभूव यत्कामास्ते जुहुमस्तन्नो अस्तुवय ँ् स्यामपतयोरयीणाम्।। अग्निष्वात्तादिपितृगणा: प्रयच्छंतु च मंगलम्। नाणकंवादयेत्। ओम् इडामग्नेपुरुद् ँ् स सनिंगो: शश्वतम ँ् हवमानायसाध। स्यान्न: सूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे। अनेन नांदीश्राध्देन नांदीमुखदेवता: प्रीयंताम्। इति सामूहिक नांदीश्राध्दं समाप्तम्।

वे. मू. गाडगीळ गुरुजी गोरेगांव यांजकडून

ॐकारश्चाथशब्दश्च, द्वावेतौ ब्रह्मण: पुरा।
कण्ठं भित्वा विनिर्यातौ, तस्मान्माङ्गलिकावुभौ।।१।।

।। श्री सप्तशती पाठ व हवन यांचा संकल्प ।।

श्री गणेशाय नमः । सपत्नीकः यजमानः शुभासनेउपविश्य आचम्य, प्राणायामं कृत्वा, पंचगव्य प्राशनं, यज्ञोपवीतं धृत्वा पुनः आचमन पवित्रक धारणपूर्वक प्राणायामं कृत्वा देवता, वंदनादि कृत्वा, हस्ते साक्षत जलं गृहीत्वा -- अमुक गोत्रोत्पन्नः अमुक शर्मा (वर्मा) अहं, अस्माकं सकलकुटुंबानां --------- वृध्द्यर्थं, महाकाली, महालक्ष्मी, महासरस्वती, त्रिगुणात्मिका, श्री नवदुर्गा अनुग्रहतो सर्वविध ऐश्वर्यादि अभिवृध्द्यर्थं अप्राप्तलक्ष्मी प्राप्त्यर्थं, प्राप्तलक्ष्मी चिरकाल संरक्षणार्थं, सकलमनसेप्सितकामनासिध्द्यर्थं, गृहकृत, राजकृत समस्त विविध पीडानिवृत्तिपूर्वकं, सर्वत्र यश विजय लाभादिप्राप्त्यर्थं, इहजन्मनि, जन्मांतरेच, सकलदुरित, उपशमनार्थं, तथाच सभार्यस्य, सापत्यांनां सबांधवानां, अखिल कुटुंबस्य,च, व्दिपद, चतुष्पद सहित, सर्वविध भय, व्याधि, विविध ज्वर पीडा परिहारपूर्वक, आयुः, आरोग्य, ऐश्वर्यादि अभिवृध्द्यर्थं तथाच, मम सहकुटुंबस्य, जन्मलग्नकुंडलिस्थ, चतुर्थ, अष्टमस्थानस्थित, ग्रहादिभिः सूचित, सूचयिष्यमाण सर्वविध अरिष्टानां विनाशपूर्वक, सर्वदा तृतीय, एकादशस्थान स्थितवत्, शुभफल प्राप्त्यर्थं, पुत्र पौत्रादि,संततेः, अविच्छिन्न वृध्द्यर्थं, इंद्रादिदशदिक्पाल प्रसन्नताप्राप्त्यर्थं, ममगृहे वास्तुस्थित, सकलदोष, परिहारार्थं, भूत - प्रेत पिशाच, ब्रह्मसमंधादि - दुष्टस्त्रीपुरुषकृत, अभिचारकर्मादि पीडा परिहारार्थं, कुलदेवता कोपोत्थित, आधिदैविक, आधिभौतिक, अध्यात्मिक, त्रिविधताप, उपशमनार्थं, कुलदेवता - कुलस्वामिनी प्रसादेन, धर्म, अर्थ, काम, मोक्ष, चतुर्विध पुरुषार्थ, सिध्दिव्दारा, व्यावहारिक सुख प्राप्त्यर्थं, पारमार्थिक अभिवृध्द्यर्थं, शांत्यर्थं, पुष्ट्यर्थं, तुष्ट्यर्थं, सकलबाधा, सकलभय-निवृत्यर्थं शारीरिक, मानसिक सर्वविधसुखप्राप्त्यर्थं, कुलदेवता, कुलस्वामी कृपाप्रसादार्थं, ब्राह्मणव्दारा, शापोध्दारमंत्र, उत्कीलनमंत्र

पुरःसरं (कवच, अर्गला, कीलक, पठन, न्यासपूर्वक नवार्णवमंत्र अष्टोत्तर जपपूर्वक) सप्तशती पाठानंतरं, रहस्यत्रय पठनांतं (अमुक मंत्र संपुटित)(अमुक मंत्र पल्लवित) नवचंडीपाठाख्यं कर्म करिष्ये। तथाच जपकर्मणः सांगतासिध्द्यर्थं, सग्रहमख जपदशांश हवनाख्यं कर्म करिष्ये। तथाच हवन दशांश तर्पणं, तर्पण दशांशं मार्जनं करिष्ये। निर्विघ्नार्थं महागणपति पूजनं, स्वस्तिवाचनं, करिष्ये। तथाच ब्राह्मण वरणं करिष्ये। (इति संकल्पः)

(विनायक श्रीधर साठे, पार्ले यांचेकडून)

श्री सप्तशती - चंडीपाठाचा संकल्प (दीर्घ)

श्री नवदुर्गा - अनुग्रहतो - ऐश्वर्य - अभिवृध्द्यर्थं - अप्राप्तलक्ष्मीप्राप्तर्थं प्राप्तलक्ष्मी - चिरकाल - संरक्षणार्थं- सकल मन ईप्सितकामना - संसिध्द्यर्थं ग्रहकृत - राजकृत समस्त विविध - पीडानिवृत्तिपूर्वकं- सर्वत्र यश - विजय लाभादि प्राप्त्यर्थं - इहजन्मनि जन्मांतरेच - सकल दुरित - उपशमनार्थं तथा सभार्यस्य सपुत्रस्य -सबांधवस्य - अखिल कुटंब - सहितस्य - व्दिपद चतुष्पद सहित- समस्त- भय - व्याधि - जरापीडा - मृत्युपरिहारव्दारा आयुः आरोग्य ऐश्वर्य- अभिवृध्यर्थं- तथा- मम - सकुटुंबस्य जन्मराशेः जन्मलग्नाभ्याम् सकाशात ये-केचित्‌विरुध्द चतुर्थ- अष्टमादिस्थानस्थिताः क्रूर- ग्रहाः तैः तैः सूचितं - सूचयिष्यमाणश्च सर्व अरिष्टं- तत्‌-विनाश व्दारा - सर्वदा तृतीय - एकादशस्थानस्थितवत्‌ शुभफल- प्राप्त्यर्थं- पुत्र पौत्रादिसंततेः- अविच्छिन्न- वृध्द्यर्थं - इन्द्रादिदश दिक्पाल- प्रसन्नता- सिध्द्यर्थं- ममगृहे वास्तुस्थित सकलदोष - परिहारार्थं भूत प्रेत-पिशाच

ब्रह्मसमंधादि-दुष्टस्त्रीपुरुषकृत-अभिचारकर्म- पीडापरिहारार्थं- कुलदेवता कोपोत्थित आधिदैविक- आधिभौतिक - आध्यात्मिक- त्रिविधताप- उपशमनार्थं-श्रीकुलदेवता प्रसादेन-धर्म-अर्थ काम-मोक्ष-चतुर्विध पुरुषार्थ सिध्दिव्दारा व्यावहारिक-सुखैकप्राप्तिः-तथा पारमार्थिक- अभिवृध्द्यर्थं शांत्यर्थं पुष्ट्यर्थं-तुष्ट्यर्थं-सकलबाधा निरसनार्थं सकल भय निवृत्त्यर्थं सकल सुख प्राप्त्यर्थं श्री कुलदेवताप्रसादार्थं त्रिगुणात्मिका-महाकाली महालक्ष्मी-महासरस्वती-कुलस्वामीनी कृपा प्राप्त्यर्थं ब्राह्मणव्दाराशापोद्धार सप्तवारं तथा उत्कीलन मंत्र एकविंशती वारं कवच- अर्गला- कीलक- पठणन्यासपूर्वकं नवार्णमंत्र- अष्टोत्तरशतजप- रहस्यत्रय- पठनांतं अमुकमंत्र(संपुटितायाः) (पल्लवितायाः) नवचंडी पाठाख्यं कर्म करिष्ये - तथाच जपकर्मणः सांगता सिध्द्यर्थं सग्रहमख दशांश हवनाख्यं कर्म करिष्ये हवन दशांश तर्पणं तर्पण- दशांशमार्जनंकरिष्ये.

।। संकटकाले सप्तशतीपाठ संकल्पः ।।

मम प्रमादात् एतावत् कालपर्यंतं कृतव्यवहारे उद्योगेच उत्पन्नानां उत्पत्स्य मानानांच सकल अरिष्टानां परिहारार्थं श्री महाकाली. महालक्ष्मी महासरस्वती त्रिगुणात्मिका दुर्गादेवता प्रसाद सिध्दये. ब्राह्मणव्दारा चंडीसप्तशत्याः व्दादशपाठात्मकं (सर्वाबाधाप्रशमनं) इति मंत्रेणसंपुटित (सपल्लव) ब्राह्मणव्दारा चंडीपाठाख्यं कर्मकरिष्ये। निर्विघ्नार्थं गणेश पूजनं वा स्मरणं पंचशब्दैः पुण्याहवाचन ब्राह्मण वरणं च करिष्ये।।

मूलमंत्र कोणाला म्हणावे?

प्रणवादि चतुर्थ्यंतं नामोंतं चैव सत्तम।
देवतायाः स्वकं नाम मूलमंत्रः प्रकीर्तितः।।
पीठदेवताहोमे मंत्रो नामैव कीर्तितः।

महाऽऽहुति

श्री गणेशाय नमः। **दुर्गोपासनकल्पोक्त सप्तशत्याः** प्रति-अध्यायान्ते महाऽऽहुतिमंत्राः लिख्यन्ते।।

१ <u>**प्रथम अध्यायः**</u>। महालक्ष्मी देवता। आहुतिद्रव्य-कवठ (कपित्थफल) मंत्र
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, वाग्बीजाधिष्ठात्र्यै, महालक्ष्म्यै, महाहुतिं, समर्पयामि नमः। अनेन कपित्थफलं, (नागवल्लीदलव्दयसहितं, कुंकुमाक्षतपुष्पैः अभ्यर्चितं, सघृतं जुहुयात्) {कंसात सूचित केलेल्या वस्तु प्रत्येक आहुतिच्या वेळी घ्याव्या}

२ <u>**व्दितीयः अध्यायः**</u>। महालक्ष्मी देवता। आहुति द्रव्य- नारिकेल फलं, (नारळ)
ओम् नमोदेव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, लक्ष्मीबीजाधिष्ठात्र्यै, महालक्ष्म्यै, महाहुतिं, समर्पयामि नमः। अनेन-नारिकेलफलं पूर्ववत् जुहुयात्।

३ <u>**तृतीयः अध्यायः**</u>। महालक्ष्मी देवता। आहुति- मोहाची फुले. ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, अष्टाविंशतिवर्णात्मिकायै, महालक्ष्म्यै, महाहुतिं समर्पयामि नमः। अनेन मधुपुष्पाणि (मोहाची फुले) पूर्ववत् जुहुयात्।

४ <u>**चतुर्थः अध्यायः**</u>। शक्तिलक्ष्मी देवता। आहुतिः- पूगीफलम् (सुपारी)
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, त्रिवर्णात्मिकायै शक्तिलक्ष्म्यै महाहुतिं समर्पयामि नमः। अनेन पूगीफलं पूर्ववत् जुहुयात्।

५ पंचमः अध्यायः। विष्णुमायादि, त्रयोविंशतिदेवता। आहुति-
महाळुंग,
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै,
विष्णुमायादित्रयोविंशतिदेवतात्मिकायै, महाहुतिं समर्पयामि नमः।
अनेन बीजापूरफलं (महाळुंग) पूर्ववत् जुहुयात्।

६ षष्ठः अध्यायः। धूम्राक्षी शताक्षी(क्षि) देवता। आहुति- नारिंग
(नारंग) ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै,
सायुधायै, शताक्ष्यै धूम्राक्ष्यै, महाहुतिं समर्पयामि नमः। अनेन
नारिंगफलं पूर्ववत् जुहुयात्।

७ सप्तमः अध्यायः। काली-चांमुडादेवता। आहुति कोहळा.
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै,
कर्पूरबीजाधिष्ठात्र्यै काल्यै चामुंडायै, महाहुतिं समर्पयामि नमः।
अनेन कूष्मांडफलं पूर्ववत् जुहुयात्।

८ अष्टमः अध्यायः। रक्ताक्षी देवता। आहुति- उसाचे कांड,
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै,
अष्टमातृकासहितायै, रक्ताक्ष्यैदेव्यै, महाहुतिं समर्पयामि नमः। अनेन
इक्षुदंडखंडं पूर्ववत् जुहुयात्।

९ नवमः अध्यायः। महाकाली देवता। कोहळयाचा तुकडा (आहुति)
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, वाग्
भवबीजाधिष्ठात्र्यै, महाकाल्यै, महाहुतिं समर्पयामि नमः। अनेन
कूष्मांडखंडं पूर्ववत् जुहुयात्।

१० दशमः अध्यायः । सिंहवाहिनी देवता । आहुति- मातुलिंग (पेरु)
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, त्रिशूलधारिण्यै सिंहवाहिन्यै, महाहुतिं समर्पयामि नमः । अनेन मातुलिंगफलं पूर्ववत् जुहुयात् ।

११ एकादशः अध्यायः । नारायणी देवता । आहुति- डाळिंब.
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, सर्वनारायण्यै महाहुतिं समर्पयामि नमः । अनेन दाडिमीफलं पूर्ववत् जुहुयात् ।

१२ व्दादशः अध्यायः । बाला त्रिपुरसुंदरी । आहुति बेलफळ
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, सर्वनारायण्यै, महाहुतिं समर्पयामि नमः । अनेन बिल्वफलं पूर्ववत् जुहुयात् ।

१३ त्रयोदशः अध्यायः । श्री त्रिपुरसुंदरी देवता । आहुति- नारळ,
ओम् नमो देव्यै० सांगायै, सपरिवारायै, सवाहनायै, सायुधायै, श्रीत्रिपुरसुंदर्यै श्रीविद्यायै, महाहुतिं समर्पयामि नमः । अनेन नारिकेलफलं पूर्ववत् जुहुयात् ।

।। इति दुर्गोपासनकल्पोक्ताःमहाऽऽहुतिमंत्राः ।।

वे. मू. वि. श्री. साठे, पार्ले.

सत्तानिवृत्ति संकल्प

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीवेदपुरुषाय नमः। यजमान; आचम्य, श्रीमन्महागधाधिपतये नमः। इष्टदेवताभ्योनमः। इत्यादि एतत्कर्मप्रधानदेवताभ्यो नमः। अविघ्नमस्तु। सुमुखश्चैक ...... श्रीमद्‌भगवतो .... सकलशास्त्र .... फलप्राप्त्यर्थं अमुक गोत्रोत्पन्नः अमुक नामा अहं अस्माकं सकलकुटुंबानां क्षेमस्थैर्य आयु-अभिवृध्द्यर्थं, मया संकल्पित अमुक कर्मणि शास्त्रोक्त अनधिकारत्वात् संकल्पित कर्मणः संपूर्ण फलप्राप्तिपूर्वक, सकलमनोरथ पूर्तिकामः अहं शास्त्र विहितसांगोपांग तत्कर्म करणार्थं, अधिकारणे ब्राह्मणाय यथासंपादित, व्यावहारिक द्रव्यम् (एक शत, सहस्त्र) यथा परिमितं द्रव्यदानं करिष्ये। निर्विघ्नार्थं गणपति पूजनं (स्वस्तिपुण्या.) द्रव्यसंभार पूजनं ब्राह्मणपूजनं च करिष्ये। गणपति पूजनादिकृत्वा, ब्राह्मणपूजनांते अमुकगोत्रोत्पन्नः अमुक नामा अहं, अमुकगोत्रोत्पन्नाय अमुकशर्मणे ब्राह्मणाय, करिष्यमाण संकल्पित कर्मणि सामग्री संपादनार्थं इदं व्यावहारिक द्रव्यंतुभ्यमहं संप्रददे। अस्य द्रव्यस्य संकल्पित कर्मणि एव व्ययं कुरु। इति ब्राह्मणं प्रार्थयेत्। समाप्तम्।

द्रव्यसत्तात्याग संकल्प

अस्माकं सकुटुंबानां. आयुःआरोग्यता. ऐश्वर्यादि प्राप्त्यर्थं तथा अस्यवास्तोः शुभता सिध्दयर्थंच द्रव्यसत्ता निवृत्तिपूर्वक. ब्राह्मणव्दारा एकाहपक्षं आश्रित्य श्री षडंगसहित. वेदपुरुषप्रीत्यर्थं बौधायनोक्तां उदकशांति करिष्ये। ब्राह्मणं संपूज्य. तांबूलउपरि (विडयावर) इदंद्रव्यं. उदकशांति जपसिध्दये. ब्राह्मणाय. निवृत्ति पूर्वकं दातु अहं उत्सृजे तेनश्रीषडंग सहितवेदपुरुषब्रह्मप्रीयतां।।

।। प्रत्यक्ष हातावर दक्षिणा न घेणें।। श्लोक ।।

मनसापात्र मुद्दिश्य, जलमध्येजलंक्षिपेत्।
दाताचव्दिगुणं प्रोक्तं, प्रतिग्राहीनदोषभाक्।।१।।

ग्रहयज्ञाचा विशेष संकल्प -----

आचम्य प्राणानायम्य सुमुखश्चेत्यादि पठित्वा अमुक गोत्रोत्पन्नः अमुक शर्मा। वर्मा अहं, मम जन्मनक्षत्र, जन्मराशिसकाशात्, नामनक्षत्र, नामराशि सकाशात्, अंगग्रहवशात्, गोचरवशात्, वामदक्षिणवेधवशात्, क्षणग्रहवशात्, उपग्रहवशात्, भावग्रहवशात्, लग्नग्रहवशात्, सर्वतोभद्रादिवशात्, जन्मलग्नात् षड्वर्ग-दशवर्ग-षोडशवर्गवशात्, महादशा- अंतर्दशा- सूक्ष्मदशा- प्राणदशा- कालचक्रवशात्, ये ये ग्रहाः, चतुर्थ- अष्टम- व्दादशरिष्ट स्थानेषु स्थिताः, तैः तैः क्रियमाण' करिष्यमाण- सूचित, दुष्ट-अरिष्ट- परिहारव्दारा, सदासर्वदा, तृतीय- एकादशस्थानादि, शुभफलप्राप्त्यर्थं, अद्य ग्रहयज्ञाख्यंकर्म, ब्राह्मणव्दारा करिष्ये।

इच्छा असेत तर पुढिल संकल्प करावा -----

तदंगं प्रत्येक ग्रहस्य एक सहस्त्र। अष्टोत्तरशत जपाख्यं कर्म करिष्ये।

आज्यावलोकन संकल्प

तिथिर्विष्णु ---------- शुभ पुण्यतिथौ, मयाकृतस्यकर्मणः सांगता सिध्द्यर्थं, आज्ये/तैलेवा स्वमुखावलोकनं तथाच मुखावलोकितआज्यं/ तैलंवा पात्रसहितं आचार्याय/शिवमंदिरे दातु महमुत्सृजे।

मुखावलोकन मंत्रः-

दिव्यांतरिक्षभूमौवा, यन्मे किल्बिषमागतम्।
तत्सर्वं आज्य/तैलसंस्पर्शात्, प्रणाशमुपगच्छतु।।१।।
अलक्ष्मीर्यच्चदौर्भाग्यं, ममगात्रे व्यवस्थितम्।।
तत् सर्वंशमयत्वाज्यं/तैलं लक्ष्मीं पुष्टिं ददातु च ।।२।।

इदं आज्य/ तैल पात्रं, दक्षिणासहितं, छायादोषःनिवृत्थं आचार्याय/शिवाय वा अहं दास्ये।।

आज्ये/तैले मुखावलोकने अशक्तः सूयविक्षणं कुर्यात्।

पवमान पंचसूक्त पठन हवन संकल्प

मम गर्भे वसतः जातस्य जायमानस्य वर्धतश्च यद्उग्रं पापं, मातृपितृवचनउल्लंघन स्थावरजंगमचौर्य गोवध, स्त्रीवधाचरण क्रयविक्रय, योनिदोष, अभक्ष्य भक्षण, अभोज्य भोजन, असत्प्रतिग्रह असद्भ्योजनेभ्यः यत्किल्मिषं, ब्रह्महत्या, सुरापान, स्वर्णस्तेय, वृषलिगमन, मैथुन संगमाच्च, यत्पापं बालहनन, मातृपितृवध, भूमितस्कर, सर्ववर्णगमन, अयाच्य याचनात्, अपमंत्र श्राध्द भोजनात् च यत्पापं, औपासन, वैश्वदेवअकरणात् च यत्पापं, तत्पापक्षयपूर्वक संवत्सरकृत, अशेष पापक्षयव्दारा, शरीर शुध्दर्थं देहांते उत्तमलोक प्रप्त्यर्थं, अपमृत्यु आदि सप्तविध मृत्युपीडा परिहारार्थं

अकृतयजन अकृताध्ययनाच्च यत् पापं एतेषां सवेर्षां जातानाम् सर्वस्मात् पातकात् निवृत्यर्थं प्रायश्चित्तार्थं ब्राह्मणव्दारा अमुकसंख्या परिमितं **पवमान पंचसूक्त** पठनं अभिषेकाख्यं कर्म करिष्ये। तथाच हवनाख्यं कर्म करिष्ये। निर्विघ्नता सिध्द्यर्थं महागणपतिपूजनं मंगलार्थं स्वस्तिपुण्याहवाचनं। कर्मसमृध्द्यर्थं मातृका पूजनं हिंसा निवरणार्थ नांदिश्राध्दं तथाच कार्य सिध्द्यर्थं आचार्यादि वरणंच करिष्ये। (अत्र विटनामा अग्निः)

—x—

हृदय विकारावर गायत्री मंत्र

ॐ भूः, ॐ भुवः, ॐ सुवः, ॐ तत्सवितुर्वरेण्यं
भर्गोदेवस्य धीमहि। ॐ धियो यो नः प्रचोदयात्।
या मंत्रात ५ वेळा ॐ चा उच्चार येतो.
संपूर्ण मंत्र १० सेकंदात म्हणावा.

अभिषेक मंत्रा:

सुरास्त्वामभिषिंचन्तु, ब्रह्मविष्णुमहेश्वरा: ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभु: ।।१।।
प्रद्युम्नश्चानिरुध्दश्च, भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान्, यमो वै निर्ऋतिस्तथा ।।२।।
वरुण: पवनश्चैव, धनाध्यक्षस्तथाशिव: ।
ब्रह्मणासहिता: सर्वे, दिक्पाला: पान्तु ते सदा ।।३।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा, पुष्टि: श्रध्दा क्रिया मति: ।
बुध्दिर्लज्जा वपु: शान्ति:, कान्तिस्तुष्टिश्च मातर: ।।४।।
एतास्त्वामभिषिंचन्तु, देवपत्न्य: समागता: ।
आदित्यश्चन्द्रमा भौमो, बुधजीवसितार्कजा: ।।५।।
ग्रहास्त्वा मभिषिंचन्तु, राहु: केतुश्चतर्पिता: ।
देवदानवगंधर्वा, यक्षराक्षस पन्नगा: ।।६।।
ऋषयोमनवो गावो, देवमातर एवच ।
देवपत्न्यो द्रुमा नागा, दैत्याश्चप्सरसां गणा: ।।७।।
अस्त्राणि, सर्वशस्त्राणि, राजानो वाहनानि च ।
औषधानिच रत्नानि, कालस्यावयवाश्चये ।।८।।
सरित:सागरा:शैला, स्तीर्थानि जलदानदा: ।
एतेत्वामभिषिंचन्तु, सर्वकामार्थसिध्दये ।।९।।
सौभाग्यं ते प्रयच्छंतु, वेदमंत्राश्च कल्पका: ।
ब्रह्माणी चैव गायत्री, सावित्री श्रीरुमा सती ।।१०।।
अरुंधत्यनसूयाच, तव संतु फलप्रदा: ।
तीर्थानि सरित: पुण्या: सरांसि पुष्कराणि च ।।११।।
अचलाश्च चलाश्चैव, तव स्वतिकरा: सदा ।
वेदव्यासश्च वाल्मीकी, रामश्चापि पराशरा: ।।१२।।

देवलः पर्वतश्चैव, दुर्वासा भार्गवस्तथा।
याज्ञवल्क्यश्चजाबालिर्जमदग्निःशुचिश्रवाः।।१३।।
विश्वमित्रः स्थूलशिराश्चवनोऽत्रिर्विदूरथः।
एकतश्च व्दितश्चैव, त्रित्नो गौतमगालवौ।।१४।।
शांडिल्यश्च भरद्वाजो, मौद्गल्यो वेदवाहनः।
कात्यायनश्च कण्वश्च, वालखिल्यास्तथैव च।।१५।।
पृथुर्दिलीपो भरतो, मांधाता च पुरुरवाः।
अंबरीषः व कुत्स्थश्च, मुचकुंदोऽथ भूभृतः।।१६।।
श्वेतश्च शृंग ान्मेरु, विंध्याद्रिर्गंधमादनः।
माल्यवान्पारियात्रश्च, सर्वएव महीधराः।।१७।।
ऋग्वेदोऽथ यजुर्वेदः, सामवेदो ह्यथर्वणः।
शिक्षाकल्पो व्याकरणं निरुक्तं ज्योतिषं तथा।।१८।।
छंदः शास्त्राणि सर्वाणि, पुराणैः सकलै सह।
गायत्री पापशमनी, दुर्गादेवी महाशिवः।।१९।।
स्थानानि च समस्तानि, पुण्यान्यायतनानि च।
लवणः क्षीरतोयश्च, घृतमंदोदकस्तथा।।२०।।
दधिमंडः, सुरोदश्च, इक्षुः स्वादूदकस्तथा।
पुष्करश्च प्रयागश्च, ाभासं नैमिषं तथा।।२१।।
गयाशिरो ब्रह्मशिरस्तथैवोत्तर मानसम्।
गंगाद्वारं कुशावर्तं, बिल्वकं नीलपर्वतः।।२२।।
वराहं भृगुतुंगश्च, शालिग्रामसरस्तथा।
शूर्परकं पौंडरीकं, गंगासागर संगमः।।२३।।
धर्मारण्यं फल्गुतीर्थं, विमुक्तं मोक्षदं तथा।
गंगा सरस्वती पुण्या, सरयू गंडकी तथा।।२४।।
कौशिकी यमुना क्षिप्रा, चंद्रभागा च गोमती।
मंदाकिनी दशार्णाच, तामसी च कुमुद्वती।।२५।।

रेवा वैतरणी भीमा, कृष्णा वेण्या महीतथा।
गोदावरी भीमरथी, गौतमी चाश्चनद्यपि।।२६।।
तुंगभद्रा ताम्रपर्णी, कावेरी नेत्रवत्यपि।
नंदा चालकनंदाच, करतोया च पिप्पला।।२७।।
सर्वपापशमन्यश्च, सर्वलोकस्यमातरः।
स्वतोयपूर्णैः कलशैरभिषिंचंतु सर्वदा।।२८।।
भूराद्याः सप्तलोकाश्च, पातालानि चतुर्युगम्।
ब्रह्मादि सप्तकल्पाश्च, मनवश्च चतुर्दश।।२९।।
संवत्सराश्च ऋतवो, मासपक्षदिनानि च।
एतेत्वामभिषिंचंतु, सर्वकामार्थसिध्दये।।३०।।
सहस्त्राक्षं शतधारमृषिभिः पावनं कृतम्।
तेनत्वामभिषिंचामि, पावमान्यः पुनंतु ते।।३१।।
भगं ते वरुणो राजा, भगं सूर्यो बृहस्पतिः।
भगमिंद्रश्च वायुश्च, भगं सप्तर्षयो ददुः।।३२।।
यत्ते केशेषु दौर्भाग्यं, सीमंते यच्च मूर्धनि।
ललाटे कर्णयोरक्ष्णोरापो निघ्नंतु ते सदा।।३३।।
अमृताभिषेकोऽस्तु, शांतिः शांतिः शांतिः
सुशांतिर्भवतु।

संदर्भ - श्री बलदेव आह्निकोक्त, उदकशांति।

हिमालयं समारभ्य यावदिंदुसरोवरम्।
तं देवनिर्मितं देशं हिंदुस्थानं प्रचक्षते॥
संदर्भ- बार्हस्पत्य संहिता

अथ मासिकनिवृत्ति संकल्प – (१३ वा दिवस)

श्री गणेशाय नमः।
कर्ता आचम्य पवित्रपाणिः प्राणायामं कृत्वा फलप्राप्त्यर्थं, पुरुरवार्द्रव संज्ञकानां विश्वेषांदेवानां, प्राचीनावीति अस्मत् पितृ, पितामह, प्रपितामहानां, अमुक शर्मणां, अमुक गोत्राणां, वसुरुद्रादित्य स्वरुपाणां (मातृ, पितामही, प्रपितामहीनां, अमुकदानां अमुकगोत्राणां, वसुरुद्रादित्य स्वरुपाणां) एते ां/एतासां, श्रेयोर्थं, मोक्षार्थं, तृप्त्यर्थं, मम पितुः/मातुः

१) ऊनमासिक २) व्दितीयमासिक ३) त्रैपाक्षिक ४) तृतीयमासिक ५) चतुर्थमासिक, ६) पंचममासिक ७) षष्ठमासिक ८) ऊनषष्ठमासिक ९) सप्तममासिक, १०) अष्टममासिक ११) नवममासिक १२) दशममासिक १३) एकादशमासिक १४) व्दादशमासिक, १५) ऊनाब्दिक एतानि पंचदश मासिकश्राध्दानि (पुनरावृत्त्या)

स्वस्वकाले, कर्तव्यानि, सर्वाणि अपकृष्य, अस्मत् कुले, चौलोपनयन, विवाहादि, अन्यतम, नांदीश्राध्दनिमित्तं, वृध्दशिष्टमतं, अनुसृत्य अपकृष्य अद्य त्रयोदशेह्नि, सदैवानि, साग्नौकरणानि सपिंडानि, पार्वणेन विधिना, अन्नेन हविषा, एकतंत्रेण, सद्यः करिष्ये। तदंगत्वेन, क्षणासन, चटरुपी ब्राह्मणप्रार्थनां, यवतिलोदकादिकंच करिष्ये। अग्रे नित्यश्राध्दवत् कुर्यात्। तत् तत् स्थाने "संकल्पित श्राध्दे" इति सर्वत्र वक्तव्यं।
" पंचदशश्राध्दानि" इति स्थाने अधिमासश्चेत् "षोडशश्राध्दानि" इति वदेत्। ।।इतिमासिक निवृत्ति संकल्पः।।
अत्रउशना मतं (उशनाभार्गवः कविः) ।
वृध्दिश्राध्दविहीनस्तु, प्रेतश्राध्दानि यश्चरेत्।
सश्राध्दी नरके घोरे, पितृभिःसहमज्जति।

या संकल्पात उल्लेखिलेली मासिक श्राध्दे त्या त्या वेळी करावयाची झाल्यास केव्हां करावीत? ती खालीलप्रमाणे करावी.

१. ऊनमासिक	२७ व्या दिवशी करावे.
२. व्दितीय मासिक	३० व्या दिवशी करावे.
३. त्रैपक्षिक	४५ व्या दिवशी करावे.
४. तृतीयमासिक	६० व्या दिवशी करावे,
५. चतुर्थमासिक	९० व्या दिवशी करावे.
६. पंचममासिक	१२० व्या दिवशी (४ था महिना)
७. षष्ठमासिक	१५० व्या दिवशी (५ वा महिना)
८. ऊनषण्मासिक	१७९ व्या दिवशी (सहा महिन्याच्या. अगोदर १ दिवस)
९. सप्तममासिक	१८० व्या दिवशी (६ वा महिना)
१०. अष्टममासिक	२१० व्या दिवशी (७ वा महिना)
११. नवम मासिक	२४० व्या दिवशी (८ वा महिना)
१२. दशम मासिक	२७० व्या दिवशी (९ वा महिना)
१३. एकादश मासिक	३०० व्या दिवशी (१० वा महिना)
१४. व्दादश मासिक	३३० व्या दिवशी (११ वा महिना)
१५. ऊनाब्दिक	३५८ व्या दिवशी (वर्ष पूर्ण व्हायच्या अगोदर २ दिवस)
१६. अब्दपूरित	३५९ व्या दिवशी (वर्ष पूर्ण व्हायच्या अगोदर १ दिवस)
१७ व्दितीयाब्दिक	३६० व्या दिवशी (वर्षश्राध्द)

विशेष

त्रिपक्षे व्दादशेपक्षे, चतुर्विंशति पक्षके।
ऊनत्रयं प्रकुर्वीत. आदिमध्यांत पंचके।।

श्री गणेशाय नमः। उदकुंभश्राध्द संकल्पः।

आचम्य देशकालौ संकीर्त्य अस्मत् पितृ पितामह प्रपितामहानां अमुक शर्मणां, अमुक गोत्राणां, वसुरुद्रादित्यस्वरुपाणां, अस्मत् मातृ पितामही प्रपितामहीनां, अमुकदानां, अमुक गोत्राणां वसुरुद्रादित्य स्वरुपाणां एतेषां एतासां श्रेयोर्थं मोक्षार्थं तृप्त्यर्थं, मृतदिनात् आरभ्य अद्यदिनपर्यंतं, स्व स्व काले अकृतानि, उदकुंभश्रध्दानि, उत्कर्षेण, आपन्निमित्तेन ब्राह्मणभोजनेन विधिना अद्य सहतंत्रेण सद्यः करिष्ये। तदंगं क्षणादि करिष्ये। संकल्पित उदकुंभश्राध्दे चटब्राह्मणाय इदमासनं, इदंपाद्यं, इदं वस्त्रं, उपवस्त्रं, गंध-पुष्प-तुलसी पत्रं, भृंगिराज पत्रं, धूप-दीपौ अच्छादनं स्वधानमः फलसहित तांबूल दक्षिणां स्वधानमः। नमःपितृभ्यः मातृभ्यः एतेआसनादि --- ---- सर्वे परिपूर्णाः भवंतु। एको विष्णुर्महद्भूतं ० भुगव्ययः।

अनेन अंतरित उदकुंभ श्राध्दीय ब्राह्मण भोजनेन पितृपितामह ०/ मातृपितामहीस्वरुपी जनार्दन वासुदेवः प्रीयतां न मम। पवित्रत्यागः कर्मांते व्दिराचम्य।

निधननिमित्तद्रव्यदान संकल्प।।

मम(पितु.) मातुर्वा. निधननिमित्तं अद्य प्रभृति अब्दपर्यंत यत् करिष्यमाण अन्नोदकादिदानं तत् अपकृष्य अद्य एव. तत्प्रतिनिधिभूतंद्रव्यं ब्राह्मणाय दातुं तथाच कानिचित् दानानि द्रव्यव्दारा वा प्रत्यक्षाणि० नाना नामगोत्रेभ्यः ब्राह्मणेभ्यः दातुं अहं उत्सृजे तेन श्री पापापहर्ता महाविष्णुः प्रीयतां नमम।।

दवाखाना हॉस्पिटल उद्घाटन संकल्प

आचम्य गणपति, कुलदेवता, कुलस्वामी, क्षेत्रपाल, वास्तुदेवतायाः कृते, फलतांबूलादि दत्वा, वृध्दान् नमस्कृत्य, स्वासने उपविश्य, हस्ते अक्षतान् गृहीत्वा.। सुमुखश्चैकदंतश्च -------

श्रीमद्भगवतः ------ विष्णोराज्ञया ---- अमुक गोत्रोत्पन्नः, अमुक शर्मा (वर्मा) अहं अस्माकं सकल कुटंबानां क्षेमस्थैर्य ---- श्रीपरमेश्वरप्रीत्यर्थं अस्मिन् औषधालये / रुग्णालये आगतानां विविध रोगपीडितरुग्णानां, रोगनिदानपूर्वक, सुविहित, सम्यक् औषधोपचारेण शरीरे आरोग्यता प्राप्तिपूर्वक, शारीरिक, मानसिक सुखप्राप्त्यर्थं, तथाच अत्र स्थितानां / आगतानांच भिषक्वर्याणां, अविचल मनसा रोगनिदानपूर्वक सुविहित औषधोपचारेण सुयश प्राप्त्यर्थं, तथाच अस्थिभंग रुग्णानां, सुविहित अस्थिसंयोग करणे, शल्यविशारदानां सोत्साहेन, स्थिरचेतसा च स्वकार्यसमये सुयश प्राप्तिपूर्वक, रुग्णानां निरोगता प्राप्त्यर्थं तथाच अत्रत्यानां सहकारिवर्गाणां विविध कार्ये नियोजितानां कर्मचारिवर्गाणांच सौहार्दपूर्वक वर्तनेन, रुग्णानां क्लेशहरणार्थं, अद्य अस्मिन् स्थले सूचित विविध सर्वदोष परिहारार्थं, ज्ञाताज्ञात क्षुद्र जीवानां पीडापरिहारार्थंच कार्यसमये आदित्यादि नवग्रहाणां आनुकूल्यार्थं, शुभफल प्राप्त्यर्थंच आदित्यादि नवग्रहदेवता कृपाप्रसादेन सर्वकर्मणि सुयश प्राप्त्यर्थं नवग्रहपूजनं, तथाच आयुर्वेदस्य देवता श्री धन्वंतरी कृपाप्रसादार्थं धन्वंतरी देवता स्थापनं पूजनं करिष्ये। निर्विघ्नार्थं महागणपतिपूजनं स्वस्तिपुण्याहवाचनं/ पंचवाक्यैः पुण्याहवाचनंच करिष्ये। देवतानां पूजनानंतर विविध यंत्रदेवतानां पूजनं करिष्ये। कर्मांति आचार्यपूजनं दक्षिणा प्रदानं करिष्ये।

कर्मांति व्दिराचमनं त्रिवारं विष्णुस्मरणं कुर्यात्।

।।संततधारेचा (पर्जन्यानुष्ठानं) संकल्प।।

महाजन अनुज्ञातोहं. मयासह सकलग्रामस्थितानां सर्वेषां सकुटुंबानां व्दिपदचतुष्पदादि जंतूनां शांत्यर्थं. सर्वतः अभ्युदयार्थंच प्रस्तुत. व्रीहि. शालि. शामक. नीवारादि धान्यानां बीजारोपितानां अंकुर पोषणपूर्वक फलसमृध्दयर्थं पटोल. तुंब्यादि शाकानां. पत्राणां. फलानां. ओषधिवनस्पतीनां. सम्यक् परिपाकार्थं. अतिवष्टि. अनावृष्टि. शलभ. मूषक. शुक. स्वचक्र परचक्राणां अग्निबाधादि. विविध बाधानां. निरासव्दारा सर्वसौख्य. प्राप्त्यर्थं शीघ्रं. यथाकालोचितपर्जन्य सुवृष्ट्यर्थं. वरुणइंद्रादिदेवताप्रीत्यर्थं. एभिः ग्रामस्थैःसह. महारुद्र देवता प्रीतये पूजनपूर्वक नमक चमकात्मकाख्य रुद्राध्याय सहितं. त्रिरात्रं संतत जलधारया. अभिषेकाख्यं कर्मकरिष्ये। तदंगं आदौ महागणपतिपूजनं. शरीरशुध्दयर्थं. महान्यासं (लघुन्यासं वा) कलशाद्यर्चनं. तथाच. परिवार देवतानां पूजनं करिष्ये।

उदकशांति (दुकानांतील) संकल्प।।

अस्मिन् स्थाने व्यवसाय. समाविष्ट जनानां सेवकादीनां. क्षेम. शांति. पुष्टितुष्टि पूर्वक. स्थैर्यार्थं तथा कार्योपयोगी वस्तूनां. आयव्यय. संग्राह्य वस्तूनांच. क्रयविक्रयादिव्यवहारे. जनताप्रीतिसंपादनेन सकलार्थप्राप्त्यर्थं वास्तुशुध्यर्थं श्रीषडंगसहित वेदपुरुष ब्रह्मप्रीत्यर्थं एकाहपक्षमाश्रित्यब्राह्मणव्दारा उदाकशांतिं करिष्ये। तदंगं गणेशपूजनादि करिष्ये।।

(१६ सोमवार) उद्यापन संकल्प

कर्ता आचम्य गणपति, कुलदेवता, कुलस्वामी, क्षेत्रपाल, वास्तुदेवतायाः कृते फलतांबूलादि दत्वा, वृध्दान् नमस्कृत्य, स्वासने उपविश्य हस्ते अक्षतान् गृहीत्वा.

श्रीमन्महागणाधिपतये नमः ---- श्रीमद्भगवतो -----
देशकालादिकं उच्चार्य, अमुक गोत्रोत्पन्नः, अमुक शर्मा (वर्मा)अहं, मया/ ममपत्न्या/ ममामात्रा, अस्माकं सकल कुटंबानां क्षेमस्थैर्य ---- सकल कुटुंबानां अभ्युदयार्थं मनसेप्सित कामना सिध्यर्थं अमुक मासस्य, सोमवासर दिनात् आरभ्य, मया/ ममपत्न्या/ ममामात्रा आचरितस्य संकट सोमवार व्रतस्य (पूजन, कथा श्रवण, / वाचन, शिवदर्शन) सांगता सिध्द्यर्थं अद्य उद्यापनाख्यं कर्म करिष्ये।
निर्विघ्नार्थं महागणपतिपूजनं, स्वस्तिपुण्याहवाचनं, मातृकापूजनं नांदीश्राध्दं, तथाच भगवतः भवानीशंकर महारुद्रदेवता प्रीत्यर्थं देशकालाद्यनुसारतः षोडशोपचारैः यथाविभवेन पूजनं करिष्ये।
(तथाच दुग्धधारया / जलधारया) ब्राह्मण व्दारा लघुरुद्राभिषेकाख्यं कर्म करिष्ये। (महिम्नाभिषेकाख्यं कर्म करिष्ये)
तथाच प्रत्येक सोमवार पूजनांगं अंतरित एकं दांपत्यभोजनं एकतंत्रेण षोडशदांपत्यान् यथोपपन्नेन अन्नेन अद्य भोजयिष्ये। यथाविभवं दांपत्यान् पूजयिष्ये। आचार्याय यथासंपादित सौभाग्य वायनप्रदानं करिष्ये। शिवपूजनांते शिवमंदिरंगत्वा गणपति, नंदिकेश्वरं भवानीशंकर पूजनं करिष्ये।

१ श्री गोदान संकल्प व्रतचंद्रिका २७९

यजमान: आचम्य प्रणायामंकृत्वा अद्येत्यादि.

मम आत्मन:-शुतिस्मृतिपुराणोक्त फल प्राप्त्यर्थं पृथ्वीदानसमफल प्राप्त्यर्थं श्री महाविष्णु प्रीत्यर्थं प्रत्यक्ष गोदानेअसमर्थ: अहम् तत् प्रतिनिधीभूतम् यथाशक्ति द्रव्यदानंकरिष्ये। निर्विघ्नार्थं गणपतिपूजनं / स्मरणंवा करिष्ये. तत् कृत्वा. स्वर्णशृंगीं रौप्य खुरां, ताम्रपृष्ठीं घंटाग्रैवेयां, (मुक्तालांगूलां कांस्योपदोहिनीम् सर्वाभरणभूषितांगां सितवस्त्रादिभि: भूषितांगां पूजयिष्ये) तप्रतिनिधि भूतं द्रव्यं पूजयिष्ये गवे नम:। द्रव्यस्वरुपी गवे नम:। इतिमंत्रेण पूजनं कृत्वा। इमां द्रव्य स्वरुपां गां, सदक्षिणा रुद्र दैवत्यां तुभ्यमहं संप्रददे। प्रतिगृह्यताम् प्रतिगृह्णामि। यज्ञसाधनभूता या विश्वस्याघौघनाशिनी।

विश्वरुप धरो देव: प्रीयतामनया गवा।

प्रार्थना

गावो रक्षंतुमे पुण्यं गावो रक्षंतुमे यश:।

नमो ऽ स्तु कामधेनुभ्यो या: पुनंति जगत्रयम्।।

३ शतगोदान संकल्प श्री गणेशाय नमः।

शतंगावः सवृषभा, धेनूपस्कर संयुताः।
दत्वातुब्राह्मणेभ्यस्तु, विशुध्देनांतरात्मना।।
शिवादि सर्वलोकेषु, यथेष्टं मोदते तु सः।।

पुण्यकाले शुचिराचम्य, गणपति, कुलस्वामी, कुलदेवताभ्यो फलतांबूलादि दत्वा, देवतावंदनपूर्वक गृहवृध्दान् नमस्कारं कृत्वा, हस्ते अक्षताः गृहीत्वा श्रीमन्महागणाधिपतये नमः। सुमुखश्चैक -------- श्रीमद्भगवतो ---------- यथायथं राशिस्थान ------ अमुक गोत्रोत्पन्नः अमुक शर्मा अहं. मम समस्त पापक्षयपूर्वक सिध्दचारण, सेवितार्कवर्ण किंकिणी, जालमालि, विमानारोहण, अनेकमन्वंतरावच्छिन्नेंद्रादि, सकल लोकपालाधिकरण, पुत्रपौत्रसमन्वित, शिवपुरादि, सर्वलोक निवासानंतरम् अंते विष्णु सायुज्यता प्राप्तिकामः, वृषाधिक सालंकृत, गोशतदानं करिष्ये। तदंगं गणपतिपूजनं, पंचवाक्यैः पुण्याहवाचनं सवृषभगोशतपूजनं, (तत् मूल्योपकल्पितरजतमुद्रापूजनं) ब्राह्मणपूजनं करिष्ये।

गणपतिपूजनं, पंचवाक्यै पुण्याहवाचनं कृत्वां, गोभ्यो नमः "इति रजतमुद्राः गंधपुष्पहरिद्राकुंकुमसहित पूजयित्वा नमस्कारं कृत्वा, ब्राह्मणाय (आचार्याय) वस्त्रालंकारादिभिःसंपूजयेत्।

गाः प्रार्थयेत् तत्रमंत्राः –

गावः सुरभयोनित्यं, गांवो गुग्गुलगंधिकाः।
गावः प्रतिष्ठा भूतानां, गावःस्वस्त्ययनंमहत्।।१।।
अन्नमेव परंगावो, देवानां हविरुत्तमम्।
पावनं सर्वभूतानां, रक्षंतिच वहंति च।।२।।
हविषामंत्रपूतेन, तर्पयंत्यमरानपि।
महर्षीणांच होतॄणां, गावो होमेप्रतिष्ठिताः।।३।।

सर्वेषामेवभूतानां, गावः शरणमुत्तमम् ।
गावःसर्वस्यलोकस्य, गावोधन्याः सवाहनाः ।।४।।
नमो गोभ्यः श्रीमतिभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च, पवित्राभ्यो नमो नमः ।।५।।
घृतक्षीरप्रदागावो, घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्ताः तामेसंतु सदागृहे ।।६।। इति
वृषभं प्रार्थयेत् - धर्मस्त्वं वृषरुपेण जगदानंदकारक।
अष्टमूर्ते रधिष्ठान, मतः पाहिसनातन ।।७।। इति

ततः सतिलकुशानादाय अद्येत्यादि ---- फलप्राप्त्यर्थं मम समस्तपापक्षयार्थं, पूर्वसंकल्पित सवृषभगोशतसहिरण्य दक्षिणायुताः रुद्रदेवता प्रीत्यर्थं गोशतमूल्य प्रतिनिधिभूत रजतमुद्राः विभज्य नानानामगोत्रेभ्यो ब्राह्मणेभ्यः दातुमहमुत्सृजे, (उदक सोडावे) न मम। तेन पापापहर्ताः श्रीपरमेश्वरःप्रीयताम्। तत्सत् ब्रह्मार्पणमस्तु। कृतस्य कर्मणः सांगता सिध्द्यर्थं, यथोपपन्नेन अन्नेन एकं ब्राह्मणं भोजयिष्ये। भूयसीं दक्षिणांच दास्ये। कर्मांति व्दिराचम्य, त्रिवारं विष्णुस्मरणं कार्यम्। ।इति सवृषगोशतदान संकल्पः ।।

संदर्भ- "दानचंद्रिका ग्रंथ"

कै. ना. का. लेले पुणे यांच्या संग्रहातून

नित्यान्नदाता, तरुणाग्निहोत्री
मासोपवासीच, पतिव्रता च ।
वेदांतवित्, चंद्रसहस्रदर्शी
षड् वंदनीयाः इह जीवलोके ।।१।।

श्री गणेशाय नमः। भूमिपूजन संकल्प

सपत्नीकः कर्ता प्राङ्मुख उपविश्य, सुवासिन्या कृतमंगलतिलकः, आचम्य (प्राणयामं कृत्वा) गणपत्यादि देवतानां कृते फलतांबूलादि दत्वा, नत्वा च वृध्दान्, स्वासने उपविशति। हस्ते अक्षताः गृहीत्वा, श्रीमन्महागणाधिपतये नमः --------------- सुमुखश्चैक ------- अमुकगोत्रोत्पन्नः अमुक शर्मा/वर्मा अहं, अस्माकं सकलकुटुंबानां, क्षेम, स्थैर्य आयुरारोग्य, ऐश्वर्यादि अभिवृद्ध्यर्थं, अत्र निवासार्थं, आगच्छतानां सर्वेषां कुटुंबीयानां व्दिपद, चतुष्पद,सहितानां, शांत्यर्थं पुष्ट्यर्थं तुष्ट्यर्थं, सर्वविध, अभ्युदयार्थं, तथाच सकलानां गृह्यकर्म आचरण समये, निर्विघ्नता प्रप्तिपूर्वक, धन, धान्यादि अभिवृद्ध्यर्थं, कायिक, वाचिक, मानसिक पीडा, परिहारार्थं, भवन निर्माणकाले, सूचित, संभाव्य, सकल अरिष्टानां परिहारपूर्वक, गुल्मलतादि, छेदन, कृमिकीटक, जलचर प्राणिघातादि दोष परिहारार्थं, भूत-प्रेत-पिशाच-यक्षराक्षसादीनां, जनितविविध विघ्न, निवारणार्थं अमेध्य (घाणेरडे) कर्मवशात्, जातदोष परिहारार्थं, अस्मिन् क्षेत्रमध्ये, चोर, पाखंड, पतित, म्लेंच्छ, शूद्रादीनां प्रवेशेन, सूचित, विविध, दोषाणां, तथाच, तेषां मूत्रपुरीषादि, अश्रुपात जातदोषाणां निरसनार्थं भवन निर्माण काले, सर्वापत्तिनिवारणपूर्वक, क्षुद्रजनानां दृष्टिदोषबाधा निवारणार्थं,

(शाळेची इमारत बांधावयाची असेल तर)

।।शाला; गृहारंभ पादभूतखननादि संकल्पः (आग्नेय खननं)।। अस्मिन् ग्रामस्थ जनानां अन्यग्रामस्थ जनानांच. बालकानां. शिक्षण प्रवीणताच शिक्षकेभ्यः विद्याप्राप्त्यर्थं. नूतनशाला गृहारंभे पादभूत (वितस्तिमात्रं) गर्तखननं. भूम्यादि देवता प्रीत्यर्थं पूजनं करिष्ये। तदंगं गणेश पूजनं, नवग्रह पूजनं, वरुण पूजनं करिष्ये।।

संकल्पित कामनया, निर्विघ्नतया च वास्तु परिपूत्यर्थंच, आदित्यादि नवग्रहाणां आनुकूल्यार्थंच, एकादशस्थानवत् शुभफल, प्राप्त्यर्थं, स्थलशुध्द्यर्थं सूर्यप्रमुख नवग्रह, वरुणपूजनं करिष्ये। आदौ स्थलशुद्ध्यर्थं, गोमूत्र प्रोक्षणपूर्वक, राक्षोघ्नमंत्र पठनं पश्चात् निर्विघ्नार्थं, गणपति पूजनं, पंचशब्दैः पुण्याहवाचनं (स्वस्तिपुण्या) करिष्ये। तथाच वराह, कूर्म अनंत (शेष, नाग) भूमि, देवतानां शस्त्रदेवतानां पूजनं करिष्ये।

राक्षोघ्न मंत्र जप - (यथाशक्ति)(सर्वत्र अक्षतान् क्षिपेत्)

रक्षोहणं सुरवरं, पायुं देवर्षि पूजितम्।
सायुधंशक्तिसंहितं, वंदेऽरिष्ट निबर्हणम्।।१।।

ततः गणपति, पूजनं, पंचशब्दैः पुण्याहवाचनं, नवग्रह, वरुण, पूजनं, कृत्वा, वराहादि देवतानां पूजनं कुर्यात्।

वराह कच्छप व नाग यांच्या प्रतिमांची पूजा करावी प्रतिमा नसतील तर सुपारी ठेवून पूजा करावी

वराह देवता (क्रोड - वराह) स्मरणं आवाहनंच

यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्
क्रौडीतनुं सकलयज्ञमयी मनंतः।
अंतर्महार्णवमुपागतमादिदैत्यं
तंद्रंष्ट्रयाऽद्रिमिव वज्रधरो ददार।।१।।
वराह देवतायै नमः, वराहदेवतां आवाहयामि।

कूर्म - (कच्छप)
क्षीरोदधावमरदानव, यूथमानां,
उन्मंदताममृत लब्धय आदिदेवः ।

पृष्ठेनकच्छपवपुर्विदधार गोत्रं
निद्राक्षणोऽद्रि परिवर्तकषाय कंडूः ।
कूर्मदिवतायै नमः । कूर्म देवता आवाहयामि ।

अनंत (शेष/नाग)
एह्येहि नागेंद्र धराधरेश, सर्वामरैर्वंदित पादपद्म ।
नानाफणामंडलराजमान, गृहाण पूजां भगवन्नमस्ते ।।
अनंत देवतायै नमः । अनंत देवतां आवाहयामि ।।

धरा (भूमि)
एह्येहि विश्वेश्वर विश्वधात्रि, वसुंधरे सर्वजनाश्रये च ।
संशोभमाने धररत्नबीजे, गृहाण पूजां पृथिवी प्रणौमि ।।
धरादेवतायै नमः । धरादेवतां आवाहयामि ।।

वराहादि आवाहित चतुष्टय देवतानां पूजनं कुर्यात् ।
वराहादि देवताभ्यो नमः "इति नाममंत्रेण पूजां कुर्यात ।
पूजा झाल्यावर पृथ्वी, कूर्म, वराह, वास्तु या देवतांना उद्देशून १, १, अर्घ्य द्यावयाची आहेत. एका फुलपात्रात पाणी भरुन घ्यावे, त्यात गंध, अक्षता, फूल, दूर्वा घालून ठेवाव्या, प्रत्येक अर्घ्य देतेवेळी उजव्या हातात पैसे व सुपारी घेऊन तयार केलेले अर्घ्यपात्रातील पाणी (अर्घ्य) "इदमर्घ्यं समर्पयामि'' असे म्हटल्यावर उजव्या

हातावरुन ताम्हनात समोर सोडावे. कर्त्याने उत्तराभिमुख बसून अर्घ्य द्यावे.

१ आगच्छसर्वकल्याणि, वसुधे लोकधारिणी।
उद्धृतासि वराहेण, सशैलवनकानना।।१।।
मंदिरं कारयाम्यद्य, त्वदूर्ध्वं शुभलक्षणे।
गृहाणार्घ्यं मया दत्तं, प्रसन्ना शुभदा भव।।२।।
धरायै नमः। इदमर्घ्यं समर्पयामि।
२ वसुधेऽनंतगर्भासि, शेष्ज्ञस्योपरिशायिनी।
तवपृष्ठे ददाम्येतद्, गृहाणार्घ्यं धरित्रि मे।।३।।
धरायै नमः। इदमर्घ्यं समर्पयामि।
३ सर्वलक्षणसंपन्नः सर्वेशः कमठाधिपः
स्थानं देहि गृहं कर्तु, गृहाणार्घ्यं नमोऽस्तुते।।४।।
कूर्माय नमः। इदमर्घ्यं समर्पयामि।
४ हेमकुंदप्रतीकाश, नागानंत महाफणिन्।
स्थानं देहि गृहं कर्तुं, गृहाणर्घ्यं नमोऽस्तुते।।५।।
अनंताय नमः। इदमर्घ्यं समर्पयामि।
वास्तोष्पते त्वममुत्तिष्ठ, संसार स्थितिकारक।
गृहाणार्घ्यं मयादत्तं गृहारंभायते नमः।।
वास्तुपुरुषाय नमः इदमर्घ्यं समर्पयामि।
अर्घ्य देऊन झाल्यावर आवाहित देवतांची प्रार्थना करावी.
पृथ्वित्वया धृता लोका, देवित्वं विष्णुना धृता।
त्वंच धारय मां देवि, पवित्रं कुरु चासनम्।।१।।
समुद्रवसने देवि, पर्वतस्तनमंडले।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे।।२।।
सर्वेषामाश्रया भूमिः वराहेण समुदधृता।
अनंतसस्य दात्री या, तां नमामि वसुंधराम्।।३।।

सर्पाधीश नमस्तुभ्यं, नागानांच गणाधिप।
सर्वारिष्ट प्रशमनं, भक्तानामभयप्रद।।४।।
आवाहित देवताभ्या`नमः। प्रार्थनां समर्पयामि।
अनेनकृत पूजनेन गणपत्यादि आवाहित देवताः प्रीयतां।
न मम। तत् सत् ब्रह्मार्पणमस्तु। आचार्याय दक्षिणा दानं।
कर्मांति व्दिर चमनं। त्रिवारं विष्णु स्मरणं कुर्यात्।
इति भूमिपूजनम्।
शिलान्यास :- आग्नेय कोणे, कर्तव्यः।

सूचना- हातभर उंच, १ वीत रुंद अशी शिला पसंत करुन शिलेवर हळद कुंकवाचे, स्वस्तिक काढावे सूत व वस्त्र गुंडाळावे. पंचगव्य / गोमूत्र, पंचामृत-स्नान घालावे. नंतर हळद कुंकू फुले वाहून पूजन करावे.

आवाहन, पूजन मंत्र - ("पूर्णानाम्नी शिला")
पूर्णे त्वंतु महाविद्ये, सर्वसंदोह लक्षणे।
सर्वंसंपूर्णमिवात्र, कुरुष्वांगिरसः सुते।।
"पूर्णानाम्न्यै शिलायै नमः" इतिमंत्रेण पूजां कुर्यात।

।। छापखान्याची पूजा।। दीपावलि (वर्षवृध्दि) संकल्प

प्राधान्यनिमित्तं प्रतिवार्षिक विहितं आयसाक्षर यंत्रसमुच्चयस्य. योगक्षेम. सिध्दिव्दारा तत् व्यवहारसिध्दयर्थं अक्षरन्यास अधिष्ठात्री श्रीमहासरस्वती. देवताप्रीत्यर्थं. पूजनं करिष्ये। तदंगं गणपतिपूजनं, नवग्रह पूजनं, वरुणपूजनंच करिष्ये।।

।। फोटोआर्टस्टूडिओनूतनस्थल संकल्प।।

अस्मिन् स्थाने अद्यदिनमारभ्य छायाचित्रकार्ये. निर्विघ्नता तथा जनताप्रीति संपादन पूर्वकं. अस्मिन् व्यवसाये उत्कर्षता प्राप्तये तथा प्रामुख्येन स्थित साधनानां तत् अधिष्ठित अग्नि, सूर्यनारायण, प्रीतिव्दारा सूर्यरश्मिभिः विद्युत सहाय्येनच तत् कर्मसुसफलताप्राप्त्यर्थं मान सन्मानांच, अग्नि, सूर्य, ब्रह्मा, विष्णु, महेश, गौर्यादि, लक्ष्मीपूजनंच करिष्ये। निर्विघ्नार्थं गणेशपूजनं पंचशब्दैः पुण्याहवाचनं, वरुणं तथाच संकल्पस्थित देवतानां पूगीफलेषु आवाहनपूर्वक पूजनं च करिष्ये।।

।। विद्युत स्थानाचा आरंभ संकल्प।।

मम आत्मना सह, अस्मिन्स्थाने, व्यवसाय समाविष्टजनानां सेवकादीनां, क्षेम, शांति, पुष्टीः, तुष्टीव्दारा, स्थैर्यार्थं, तथाच, कार्योपयोगीवस्तूनां आय, व्यय, संग्राह्य वस्तूनां, क्रय विक्रयादि व्यवहारे, जनता प्रीति, संपादनेन, सकलार्थ प्राप्त्यर्थं, यंत्रकर्मकारिजनानां, घातपातादिभ्यः, निर्विघ्नतया, सुखेन, रक्षणार्थंच, उत्कर्षार्थं, विद्युत् सहायेन, निर्माण, नाना विभाग, यंत्राणां, स्थापनार्थं, विद्युतशक्ति, अधिष्ठात्री, अग्निदेवता, तत्अनुषंगेन विहित, विष्णु शिव, गौरी, लक्ष्मी, पूगीफलेषु पूजनं करिष्ये। तदंगं गणेशपूजनं, पंचशब्दै पुण्याहवाचनं, नवग्रह तथा वरुण पूजनंच करिष्ये।

यमद्वितीया (भाऊबीज) संकल्प।।

मम इहजन्मनि जन्मांतरेच अखंडित, सौभाग्य, पुत्रपौत्रादि, सुखपूर्वकं श्रीयमधर्मात्मक, महाविष्णुप्रीत्यर्थं, व्रतकल्पोक्त फलावाप्तये, अद्य कार्तिक शुध्द द्वितीया व्रत प्रधानांगत्वेन विहितं यम यमुने पूजनं, तथाच, अभ्यंग स्नान, उद्वर्तन, अनुलेपन, भोजनादि, यथाशक्त्या वस्त्रादिभिः भ्रातृपूजनं करिष्ये। तदंगं गणेश पूजनं स्वस्ति पुण्याहवाचनं मातृका पूजनं नांदीश्राध्दं करिष्ये। ततः एकं कलशं प्रतिष्ठाप्य, सुवर्ण प्रतिमयोः, यम यमुने, षोडशोपचारैः, पूजनं करिष्ये।। यमयमुनयोः पूजनं कृत्वा।

मंत्र

धर्मराजनमनस्तुभ्यं, नमस्ते यमुनाग्रज।
पाहिमां किंकरैः सार्धं, सूर्यपुत्र नमोस्तुते।।१।।
यमः स्वसर्नमस्तेस्तु, यमुने लोकपूजिते।
वरदाभवमे नित्यं, सूर्यपुत्रि नमोस्तुते।।२।।

यमुनासहित यमाय नमः इति षोडश उपचारैः संपूज्य। अर्घ्यंदद्यात् तत् यथाः - एह्येहिमार्तंडज पाशहस्त, यमांतको लोकधरामरेश।
भातृद्वितीया कृतदेवपूजां, गृहाणचार्घ्यं भगवन् नमस्ते।।१।।

यमुनासह यमाय नमः इदमर्घ्यं समर्पयामि।
भातृसत्कारंकृत्वायमुनासह यमाय नमः इदमर्घ्यं समर्पयामि।
भातृसत्कारंकृत्वा भगिन्या नीराजनं कार्यं।।
अनेन कृतपूजनेन यमयमुने तथा अन्य देवताः प्रीयतां न मम।

श्री गणेशाय नमः।

अधिमासः। संक्रांतिरहितोमासोऽधिकमासः।। संकल्प

तत्र अपूपदानमुक्तं रत्नावल्यां।

सगुडान् साज्यपात्रांश्च त्रयस्त्रिंशत् अपूपकान्।

कांस्यपात्रे विनिक्षिप्य हिरण्येन समन्वितान्।।१।।

उपानच्छत्रसंयुक्तं विप्राय विनिवेदयेत्।

यावंति तत्र छिद्राणि अपूपानांच पार्थिव।

तावद्वर्षसहस्राणि स्वर्गलोके महीयते।।२।।

निर्णयसिंधौ पाद्मे -

त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने।

तथा अधिमासेतु संप्राप्ते त्रयस्त्रिंशत्तुदेवाताः।

उद्दिश्यापूपदानेन पृथ्वीदान फलं लभेत्।   इति

अथ त्रयस्त्रिंशद्देवताश्च श्रुतौ उक्ताः।

अष्टौवसव, एकादशरुद्र, व्दादशादित्यः, प्रजापतिः, वषट्कारश्च,

।।अयमत्रप्रयोगः संकल्पश्च।।

देशकालौसंकीर्त्य, मम अष्टवसु, एकादशरुद्र, व्दादशादित्य, प्रजापतिः, वषट्कारात्मक, श्रीपरमेश्वर प्रीतिव्दारा, सकलमलविशुध्दि, सर्वपापक्षयपूर्वक, लक्ष्मीसंपत्ति, पुत्रपौत्रादि, अभिवृध्दि पृथ्वीदानसमफल, स्वर्गलोक निवासप्राप्त्यर्थं, मलमास विहितं अपूपदानं करिष्ये। विप्रस्य अग्रे यथाशक्ति सोपस्कार अपूपपात्रं निधाय प्रार्थयेत् -

चंद्रांशुनिर्मलापूपाः शालितंडुलनिर्मिताः।

आहारः सर्वदिवानां ते मे कुर्वंतु च मंगलम्।।१।।

विष्णुरुपी सहस्त्रांशुः सर्वपापप्रणाशनः।

अपूपान्नप्रदानेन मम पापं व्यपोहतु।।२।।

यस्य हस्ते गदाचक्रं गरुडोयस्य वाहनः।
शंखः करतले यस्य समे विष्णुः प्रसीदतु।।३।।
कलाकाष्ठादिरुपेण निमेषघटिकादिना।
योवंचयति भूतानि तस्मैकालात्मने नमः।।४।।
कुरुक्षेंत्रमयं देशः कालः सर्वव्दिजो हरिः।
पृथ्वीसममिदं दानं, गृहाणपुरुषोत्तम।।५।।
मलानांच विशुद्‌ध्यर्थं, पापप्रशमनायच।
पुत्रपौत्रादि वृध्द्यर्थं, तवदास्यामि भास्कर।।६।।
इमान् त्रयस्त्रिंशत् संख्याकान् अपूपान घृतपात्रादिसहितान्
कांस्यपात्रे निहितान्, अमुकशर्मणे, महाविष्णुस्वरुपिणे ब्राह्मणाय,
सदिक्षणं, संप्रददे। प्रतिगृह्णातु भवान्।। प्रतिगृह्णामीतिब्राह्मणः।।
ततः कर्ता प्राथयेत् -
नारायण जगव्दिज, भास्कर प्रतिरुपक।
दानेनानेन पुत्रांश्च संपदंचाभिवर्धय।।
कर्ता - अनेन मलमासविहित, अपूपदानेन, भगवान्
त्रयस्त्रिंशत् स्वरुपी परमेश्वरः प्रीयताम्।।
अधिकमासात- व्दादशी, पौर्णिमा, व्यतीपात हे दिवस अपूपदानासाठी
अधिक श्रेष्ठ आहेत.
अपूपदान अन्य कोणत्याहि दिवशी दिले, तरी हरकत नही,

समाप्त

संदर्भ - कृत्यसंग्रह

प्रायश्चिप्त संकल्प -

आचम्य देशकालौ संकीर्त्य अमुक गोत्रोत्पन्नः अहं मम सपत्नीकस्य जन्मप्रभृति एतावत्कालपर्यंतं, ज्ञाताऽज्ञात कामाकाम, सकृत्, असकृत्, कायिक, वाचिक, मानसिक, सांसर्गिक स्पृष्टाऽस्पृष्ट दृष्टाऽदृष्ट भुक्ताऽभुक्त, पीतापीत, सकलपातक, अतिपातक, उपपातक, लघुपातक, संकलीकरण, मलिनीकरण, अपात्रिकरण, जातिभ्रंशकर, प्रकीर्ण पातकानां मध्ये संभावित पापानां निरसनार्थं, तथाच दैनंदिन व्यवहारमध्ये (शिखा, यज्ञोपवीत, प्रातःसायं संध्यादि) स्वस्वकर्मराहित्यदोषाणां अपनोदार्थ (षट्कृच्छ्र, प्रायश्चित्तं, तत् प्रत्याम्नाय गोनिष्क्रयीभूत) यथाशक्ति व्यावहारिकद्रव्य दानेन अहं आचरिष्ये।

।।समाप्त।।

हरितालिका व श्रीगणेश चतुर्थी

हरितालिका व्रतास तृतीया चतुर्थीयुक्त घ्यावी आणि श्रीगणेश चतुर्थी तृतीया विद्ध घ्यावी असे शास्त्र आहे, त्याप्रमाणे या वर्षी भाद्रपद महिन्यामध्ये २७ ऑगस्ट २००६ रोजी रविवारी हरितालिका तृतीया व श्रीगणेश चतुर्थी एकाच दिवशी आहे. अशा वेळेस कोणतीही पूजा आधी वा नंतर करता येते. तृतीया समाप्तीपूर्वी हरितालिका पूजन करावयास पाहिजे असे नाही आणि तृतीया संपल्यावर श्रीगणेश पूजन करावयास पाहिजे असे नाही. उषःकाला पासून मध्यान्हापर्यंत पूजाकाल असल्याने आणि दोन्ही व्रताचे कर्ते भिन्न असल्याने कोणतीही पूजा आधी वा नंतर करता येते. म्हणजे श्री गणेश पूजन आधी करून नंतर हरितालिका पूजन करता येईल.

घरातील देवपूजा झाल्यावर आपल्या आणि गुरुजींच्या सोयीनुसार श्रीगणेशाचे प्राणप्रतिष्ठापूर्वक पूजन करावयाचे आहे. त्यासाठी विशिष्ट नक्षत्र, विशिष्ट लग्न, अमृत, घबाड, शुभ, लाभ, अशा प्रकारचे मुहूर्त असण्याची आवश्यकता नाही. माध्यान्हकालपर्यंत कोणत्याही वेळी श्रीगणेशाचे पूजन करता येते.

वंध्यत्व निवारणार्थ नागपूजा– (पान ५९ ते ६३)

नागपूजा विधान ही पूजा खाली दिलेल्या महिन्यात शुध्द पंचमीच्या दिवशी सकाळी करावी.

१ चैत्रे २ श्रावणमासे च ३ वैशाखे ४ कार्तिके तथा।
५ माघे शुक्लेच पंचम्यां कर्तव्यं नागपूजनम्।।

चैत्र, वैशाख, श्रावण, कार्तिक, व माघ या प्रत्येक महिन्यात शु. पंचमीच्या दिवशी फलप्राप्तीपर्यंत ही पूजा करावी.

आचम्य (प्राणानायम्य) गणपतिकुलस्वामी कुलदेवताभ्यो फलतांबूलादि समर्प्य, देवतावृघ्दान् नमस्कृत्य. स्वासने उपविश्य हस्ते अक्षतान् गृहीत्वा श्रीमन्महागणाधिपतये नमः सुमुखश्चेत्यादि पठित्वा हस्ते जलमादाय अद्येत्यादि० पुण्यतिथौ मम आत्मनः पुत्रपौत्रादि, अनवच्छिन्नसंतति, स्थिरलक्ष्मी, कीर्तिलाभ, शत्रुपराजयव्दारा, सदभीष्टसिध्द्यर्थं, वंध्यत्वनिरसनपूर्वकं, दीर्घायुःपुत्रप्राप्त्यर्थं गर्भसंभवात् प्रसूतिपर्यंत गर्भस्य स्थिरता प्राप्त्यर्थं अद्य यथाज्ञानेन, यथामीलितउपचारैः देशकालाद्यनुसारतः तक्षकादि नवनागदेवतानां कृपाप्रसादार्थं, तक्षकादिनागानां आवाहनादि षोडशोपचार पूजनं करिष्ये. निर्विघ्नार्थं गणपतिपूजनादि करिष्ये.

गणपतिपूजनादि कृत्वा पूर्णपात्रे तत् तत् स्थाने मंत्रोच्चारपूर्वकं नवनागानां आवाहनपूर्वक षोडशोपचार पूजां कृत्वा, प्रार्थना करावी. –

पूर्व

९ शेष	२ वासुकि	३ कर्कोटकं
८ कंबल	१ तक्षक	४ अनंत
७ नील	६ महापद्म	५ शंखपाल

उत्तर — दक्षिण

पश्चिम

पूर्णपात्रात मध्ये चांदीची नागप्रतिमा व अन्य ठिकाणी सुपारी ठेवून नागदेवतांचे आवाहन करावे. नागीण म्हणून गूळ ठेवून त्याची पूजा करावी. "तक्षकदि आवाहित देवताभ्यो म:" या मंत्राने पूजा करावी. दुधाचा नैवेद्य दाखवावा.

पूजा पूर्ण झाल्यावर म्हणावे -

नवकुलाय विद्महे विषदंताय धीमहि। तन्न: सर्प: प्रचोदयात्।

त्या नंतर मातीच्या मोठ्या पणतीत दूध ठेवून प्रार्थना करावी.

प्रार्थना मंत्र- अंतरिक्षेच ये सर्पा ये सर्पा भूमिपालका:।
तेभ्यो दुग्धं मयादत्तं प्रजामृतमसिंचये।।

संकल्पाप्रमाणे गणपतिपूजनादिक करुन चित्रात दाखविल्या प्रमाणे पूर्णपात्रात मंत्रोच्चारपूर्वक नवनागांचे आवाहन करुन षोडशोपचार पूजा करावी.

नागपूजेसाठी आवाहन मंत्र - अक्षता वाहून चित्रात दाखविल्याप्रमाणे सुपारीवर नागदेवतांचे आवाहन करावे. प्रत्येक वेळी रजतप्रतिमायां/पूगीफले आवाहयामि असे म्हणावे.

१) वैश्यवर्गं नीलवर्णं फणैः पंचशतैर्युतम्।
युक्तमुत्तुंगकायं च तक्षकं प्रणमाम्यहम्।।१।।
रजतप्रतिमायां/पूगीफले तक्षकाय नमः।
तक्षकं आवाहयामि।

२) क्षत्रवर्गं पीतवर्णं फणैः सप्तशतैर्युतम्।
युक्तमुत्तुंगकायं च वासुकिं प्रणमाम्यहम्।।२।।
पूगीफले वासुकये नमः। वासुकिं आवाहयामि।

३) शूद्रवर्गं श्वेतवर्णं शतत्रय फणायुतम्।
युक्तमुत्तुंगकायं च कर्कोटं च नमाम्यहम्।।३।।
पूगीफले कर्कोटकाय नमः। कर्कोटकं आवाहयामि।

४) अनंत विप्रवर्गं च तथा कुंकुमवर्णकम्।
फणासहस्त्रसंयुक्तं तं देवं प्रणमाम्यहम्।।४।।
पूगीफले अनंताय नमः। अनंतं आवाहयामि।

५) शंखपालं क्षत्रियं च पीतं सप्तशतैः फणैः।
युक्तमुत्तुंगकायं च शिरसा प्रणयाम्यहम्।।५।।
पूगीफले शंखपालाय नमः। शंखपालं आवाहयामि।

६) वैश्यवर्गं नीलवर्गं फणैः पंचशतैः युतम्।
युक्तमुत्तुंगकायं च महापद्मं नमाम्यहम्।।६।।
पूगीफले महापद्माय नमः। महापद्मं आवाहयामि।

७) वैशवर्गं नीलवर्णं फणैः पंचशतैर्युतम्।
युक्तमुत्तुंगकायंच तन्नीलं प्रणमाम्यहम्।।७।।

पूगीफले नीलाय नमः। नीलं आवाहयामि।

८) कंबलं शूद्रवर्गंच शतत्रयफणैर्युतम्।

आवाहयामि नागेशं प्रणमामि पुनः पुनः।।८।।

पूगीफले कंबलाय नमः। कंबलं आवाहयामि।

९) विप्रवर्गं श्वेतवर्णं सहस्त्रफणसंयुतम्।

आवाहयाम्यहं देवं शेषं वै विश्वरुपिणम्।।९।।

पूगीफले शेषाय नमः। शेषं आवाहयामि।

नवनागांबरोबर नागीण म्हणून गूळ ठेवून त्यावर "अमृतरक्षिण्यै नमः। अमृतरक्षिणीं आवाहयामि'' असे म्हणून अक्षता वाहून आावाहन करावे व नवनागांबरोबर पूजा करावी.

संकल्पा प्रमाणे आवाहन केलेल्या सर्वांची पूजा झाल्यावर सर्पसूक्त म्हणावे.

सर्पसूक्त – ब्रह्मलोके च ये सर्पाः शेषनागपुरोगमाः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा ।।१।।
विष्णुलोकेच ये सर्पाः वासुकि प्रमुखाश्च ये।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा।२।
रुद्रलोके च ये सर्पाः तक्षकप्रमुखास्तथा।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा।।३।।
खांडवस्य तथा दाहे स्वर्गं ये च समाश्रिताः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा।।४।
सर्पसत्रे च ये सर्पा आस्तिकेन च रक्षिताः।।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा।।५।
प्रलये चैव ये सर्पाः कर्कोटप्रमुखाश्चये। ।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा।।६।।

धर्मलोके च ये सर्पाः वैतरण्यां समाश्रिताः। ।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा। ।७। ।
ये सर्पाः पार्वतीयेषु दरीसंधिषु संस्थिताः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा। ।८। ।
ग्रामे व यदि वाऽरण्ये ये सर्पाः प्रचरंति हि। ।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा। ।९। ।
पृथ्विव्यां चैव सर्पा ये, सर्पा ये बिलसंस्थिता। ।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा।१०। ।
श्रसातले च ये सर्पा अनंताद्या महाबलाः। ।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा। ।११। ।

इति सर्पसूक्तम्।
उदक सोडावे - अनेन कृतपूजनेन नवनाग देवता प्रीयतां न मम (गुरुजींकडून विसर्जनासाठी अक्षता घ्याव्यात) गुरुजींना विडा दक्षिणा देऊन नमस्कार करावा. नंतर स्वतः पूजकाने सर्पसूक्त वाचावे. दुसऱ्या दिवशी गणपति व नागदेवातांचे अक्षता वाहून विसर्जन करावे. (संदर्भ- व्रतोद्यापन चंद्रिका)
इति नागपूजा समाप्ता।

दशविध स्नान

नदीसमीपं गत्वा आचम्य --- (प्राणायामादि कृत्वा) अद्येत्यादि ----- शुभपुण्यतिथौ मम कायिक वाचिक मानसिक सांसर्गिक चतुर्विध सकल पापक्षयार्थं दशविध स्नानानि करिष्ये।

असा संकल्प करुन भस्मस्नानादि दशविध स्नान करावे.

१)भस्मस्नान - यथाग्निर्दहते भस्म तृणकाष्ठादिसंचयम्।।
तथा मे दहतां पापं कुरु भस्म शुचे शुचिम्।।१।।

२)मृत्तिकास्नान - अश्वकान्ते रथक्रान्ते विष्णुक्रान्ते वसुंधरे।।
उद्धृतासि वराहेण कृष्णेन शतबाहुना।।१।।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्।।
मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता।।२।।

३)गोमयस्नानम् - गोमये वसते लक्ष्मीः पवित्रं सर्वमंगलम्।।
स्नानार्थं संस्कृतं देव पापं मे हर गोमय।।१।।
अग्रमग्रं चरन्तीनामौषधीनां वने वने।।
तासामृषभपत्नीनां पवित्रं कायशोधनाम्।। २।।
यन्मे रोगं च शोकं च तन्मे दहतु गोमय।।३।।

४)पंचगव्यस्नानम् - गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।।
सर्वपापविशुध्द्यर्थं पंचगव्यं पुनातु माम्।।१।।

५)गोरजस्नानम् - गवां क्षुरेण निर्घृष्टं यद्रेणु गगने गतम्।।
शिरसा तेन संलेपो महापातकनाशनम्।।१।।

६)धान्यस्नानम् - धान्यौषधी मनुष्याणां जीवनं परमं स्मृतम्।।
तेन स्नानेन देवेश मम पापं व्यपोहतु।।१।।

७)फलस्नानम् - वनस्पतिरसो दिव्यः फलपुष्पवृतः सदा।।
तेन स्नानेन मे देव फलं पुष्पमनन्तकम्।।१।। ण्य

८)सर्वौषधीस्नानम् - औषध्यः सर्ववृक्षाणां तृणगुल्मलतोभ्दवाः।।
दूर्वासर्षपसंयुक्ताः सर्वौषध्यः पुनन्तु माम्।।१।।

९)हिरण्यस्नानम् - हिरण्यंगर्भगर्भस्थं हेमबीजं विभावसोः।।
अनन्तपुण्यफलदं मम पापं व्यपाहतु।।१।।

१०)कुशोदकस्नान - गंगोदकस्नानम्-
विष्णुपादाग्रसंभूते गंगे त्रिपथगामिनि।।
धर्मद्रवेति विख्याता पापंमे हर जाह्नवि।।१०।।

।। इति दशविधस्नानम्।।

।।अथ वरुण सूक्तम्।।

देवदानव संवादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदा कुंभः विधृतो विष्णुनास्वयम्।।१।।
त्वत्तोयेसर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठंति भूतानि त्वयिप्राणाःप्रतिष्ठिताः।।२।।
शिवःस्वयं त्वमेवाऽसि विष्णुस्त्वंच प्रजापतिः।
आदित्या वसवोरुद्रा विश्वेदेवाः सपैतृकाः।।३।।
त्वयितिष्ठंति सर्वेऽपि यतःकामफलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव।।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा।।४।।
पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक।
पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते।।५।।
नमोनमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।।६।।
।।इति वरुणसूक्तम्।।

दशदिक्पाल देवता -

१ इंद्र - वज्रायुधं देवदेवं पूर्वदिक्पालकं सदा।
अनेकयज्ञकर्तारं इंद्रं वंदे सुरेश्वरम्।।१।।

२ अग्नि - आग्नेयदिक्प्रभुं दीप्तं शक्तिप्रहरणं परम्।
ज्वालाव्याप्ततनुं वंदे अग्निं लोकशुभंकरम्।।२।।

३ यम - सर्वप्राणिनियंतारं याम्य दिक्पातिमीश्वरम्।
महादंडधरं देवं यमं तं प्रणमाम्यहम्।।३।।

४ निर्ऋति - राक्षसाधिपतिंशूरं नैर्ऋत्याधीशमीश्वरम्।
खड्गप्रहरणं वंदे निर्ऋतिं लोकरक्षकम्।।४।।

५ वरुण - पाशायुधधरं देवं प्रतीचीदिक्प्रपाकलम्।
सर्वेषां जीवनं वंदे वरुणं यादसां पतिम्।।५।।

६ वायु - इंद्रकृतानेकरुपं दितिसंभूतमद्भुतम्।
वायव्यदिक्प्रभुं वंदे वायुमंकुशधारिणम्।।६।।

७ कुबेर - यक्षराजं धनाध्यक्षं उदोचीदिक्पतिं प्रभुम्।
लोकपालमहं वंदे कुबेरं सुगदाधरम्।।७।।

८ ईश्वर -ऐशान्याधिपतिं देवं सर्वदेवसुसेवितम्।
सर्वेश्वरेश्वरं वंदे शूलधारिणमीश्वरम्।।८।।

९ ऊर्ध्वायां - ऊर्ध्वदिक्पालकं नित्यं लोकसृष्टिविधायकम्।
ब्रह्मा पितापहं प्रभुं देवं ब्रह्माणं प्रणमाम्यहम्।।९।।

१० अधः - सर्वकल्याणकर्तारं फणामंडलमंडितम्।
अनंतम् अधोदिक्पालकं दिव्यं अनंतं प्रणमाम्यहम्।।१०।।

व्रतोद्यापन-चंद्रिका (संदर्भ)

दशावतार जयंत्या -

० अवतार	महिना	तिथि	काल
१ मत्स्य	चैत्र	शु. ३	अपराह्ण
२ कुर्म	वैशाख	पौर्णिमा	सायंकाल

३ वराह	भाद्रपद	शु. ३	अपराह्ण
४ नृसिंह	वैशाख	शु. १४	सायंकाल
५ वामन	भाद्रपद	शु. १२	मध्यान्ह
६ परशुराम	वैशाख	शु. ३	मध्यान्ह / प्रदोषकालहि मानतात
७ श्रीराम	चैत्र	शु. ९	मध्यान्ह
८ श्रीकृष्ण	श्रावण	वद्य ८	मध्यरात्री
९ बौध्द	अश्विन	शु. ९	सायंकाळ
१० कल्की	श्रावण	शु. ६	सायंकाळ

	चार युगांचा प्रारंभ तिथि		वर्ष
कृतयुग	कार्तिक शु. ९	१७,२८,०००	सौरवर्ष
त्रेतायुग	वैशाख शु. ३	१२,९६,०००	सौरवर्ष
व्दापारयुग	माघ ३०	८,६४,०००	सौरवर्ष
कलियुग	भाद्रपद वद्य १३	४,३२,०००	सौरवर्ष
	एकूण वर्ष →	४३,२०,०००	

कापूर ओवाळून झाल्यावर राजोपचारासाठी अक्षता वाहाव्यात

।। राजोपचार मंत्र ।।

स्तुतिभि:सहितं गीतं निर्मितं दिव्यमुत्तमम् ।
नित्यश:कल्पितं भक्त्या गृहाण करुणानिधे ।। गीतं समर्पयामि ।
वीणातालमृदंगादिखंडभेरी च घंटिका ।
दुंदुभिर्वेणुनादश्च श्रूयतां सुरसत्तम ।।२।।वाद्यं समर्पयामि ।
उभयोश्चरणे बध्द्वा क्षुद्रघंटा: सुभक्तित: ।
तुष्ट्यर्थं सर्वदेवानां कृतं नित्यं विलोकय ।।३।। नृत्यं समर्पयामि ।

हरिन्मणिगणाबध्दं दंडशक्तिकरप्रभम्।
सुवर्णछत्रं शोभाढ्यं गृहाण करुणानिधे।।४।। छत्रं समर्पयामि।
सुवेणुदंडसंयुक्तं चमर्याः केशसंयुतम्।
चामरं कल्पितं भक्त्या गृहाण सुरसत्तम्।।५।। चामरं समर्पयामि।
सवितृकिरणस्पर्धि स्फुरत्किरणमंडलम्।
आदर्शं मणिभिर्युक्तं प्रतिरुपं विलोकय।।६।। दर्पणं समर्पयामि।
प्रवालनालसद्गात्रे मुक्तामणि विभूषिते।
पट्टसूत्रमयं देव मंचके शयनं कुरु।।७।। मंचकं समर्पयामि।
उशीरनिर्मितं दिव्यं हेमदंडसमन्वितम्।
व्यजनं च मया दत्तं गृहाण परमेश्वर।।८।। व्यजनं समर्पयामि।

श्री गणेशाय नमः । (नवग्रहवर्णनम्)

सूर्य - पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वः सप्तरज्जुश्च, व्दिभुजः स्यात् सदारविः । ।१ । ।

सोम - श्वेतः श्वेतांबरधरः श्वेताश्वः श्वेतवाहनः ।
गदापाणिर्व्दिबाहुश्च कर्तव्यो वरदः शशी । ।२ । ।

मंगळ - रक्तमाल्यांबधरः शक्तिशूलगदाधरः ।
चतुर्भुजः रक्तरोमा वरदःस्याद् धरासुतः । ।३ । ।

बुध - पीतमाल्यांबधरः कर्णिकारसमद्युतिः ।
खड्गचर्मगदापाणिः सिंहस्थो वरदोबुधः । ।४ । ।

गुरु - देवानांच गुरुस्तद्वत् पीतवर्णश्चतुर्भुजः ।
दंडीच वरदः कार्यः साक्षसूत्रकमंडलुः । । ५ । ।

शुक्र - दैत्यानांच गुरुस्तद्वत् श्वेतवर्णश्चतुर्भुजः ।
दंडीच वरदः कार्यः साक्षसूत्रकमंडलुः । । ६ । ।

शनि - इंद्रनीलद्युतिःशूलीः वरदोगृध्रवाहनः ।
बाणबाणासनधरः कर्तव्यो ऽ र्कसुतस्तथा । ।७ । ।

राहु - करालवदनःखड्ग, चर्मशूली वरप्रदः ।
नीलसिंहासनस्थश्च, राहुरत्र प्रशस्यते । ।८ । ।

केतु - धूम्रा व्दिबाहवःसर्वेः, गदिनो विकृताननाः ।
गृध्रासनगता नित्यं, केतवःस्युर्वरप्रदाः । ।९ । ।

पीडापरिहारक नवग्रह स्तोत्र

ग्रहाणामादिरादित्यो, लोकरक्षणकारक: ।
विषमस्थानसंभूतां, पीडां हरतु मे रवि: ।।१।। रवि
रोहिणीश: सुधामूर्ति:, सुधागात्र: सुधाशन: ।
विषमस्थानसंभूतां, पीडां हरतु मे विधु: ।।२।। सोम
भूमिमुत्रो महातेजा, जगतां भयकृत् सदा ।
वृष्टिकृत् वृष्टिहर्ताच, पीडां हरतु मे कुज: ।।३।। मंगळ
उत्पातरुपोजगतां, चंद्रपुत्रो महाद्युति: ।
सूर्यप्रियकरो विद्‌वान्, पीडां हरतु मे बुध: ।।४।। बुध
देवमंत्री विशालाक्ष:, सदालोकहिते रत: ।
अनेक शिष्यसंपूर्ण:, पीडां हरतु मे गुरु ।।५।। गुरु
दैत्यमंत्री गुरुस्तेषां, प्राणदश्च महामति: ।
प्रभुस्तराग्रहाणां च, पीडां हरतु मे भृगु: ।।६।। शुक्र
सूर्यपुत्रो दीर्घदेहो, विशालाक्ष: शिवप्रिय: ।
दीर्घचार: प्रसन्नात्मा, पीडां हरतु मे शनि: ।।७।। शनि
महाशिरा महावक्त्रो, दीर्घदंष्ट्रो महाबल: ।
अतनुश्चोर्ध्वकेशश्च, पीडां हरतु मे तम: ।।८।। राहु
अनेकरुपवर्णैश्च, शतशोऽथ सहस्रश: ।
उत्पातरुपो जगतां, पीडां हरतु मे शिखी ।।९।। केतु

नवग्रहासंबंधात विशेष महिती।।नवग्रहादि वर्णनम्।।

सूर्य: सोमो महीपुत्र:, सोमपुत्रो, बृहस्पति:।
शुक्र:, शनैश्चरो, राहु:, केतुश्चेतिग्रहा:स्मृता:।।

प्रतिमानांधातु:

ताम्रकात् स्फटिकात् रक्तचंदनात् स्वर्णकादुभौ।।
राजतात् अयस:, सीसात् कांस्यात् कार्याग्रहा: क्रमात्।।

ग्रहाणां देशा:

कलिंग यमुनातीराऽवंती मगध सिंधव:।
स्युर्भोजकट सौराष्ट्र, राठीनांतर वेदिका:।।१।।

ग्रहाणां गोत्राणि

कश्यपोत्रिर्भरव्दाजात्र्यंगिरोभृगुकश्यपा:।।
पैठीनो जैमिनिश्चेति, ग्रहगोत्राण्यनुक्रमात्।।२।।

ग्रहाणां मंडलानि

वर्तुलं चतुरस्रंच, त्रिकोणं बाण एव च।
दीर्घाब्धस्रं पंचकोणं, धनु: शूर्प ध्वजोर्कत:।।३।।
(दीर्घाब्धस्रं-चतुरस्रं)

ग्रहाणां मुखानि

शुक्रार्कौप्राङ्मुखौज्ञेयौ, गुरुसौम्या वुदङ्मुखौ।।
प्रत्यङ्मुख: शनि: सोम:, शेषा दक्षिणतोमुखा:।।४।।
(शेषा:-कुजराहुकेतव:)

ग्रहाणां वर्णानि

आदित्योंगारकौ रक्तौ, श्वेतौ शुक्रनिशाकरौ।
शनि राहौ कृष्ण वर्णौ, गुरु सौम्यौतु पीतकौ।।
केतुश्च धूम्रवर्णस्यात्, ग्रहाणां वर्णलक्षणं।।५।।

नवग्रहांसाठी हवनीय फळे - सूर्यादि क्रमाने - १)द्राक्ष २)इक्षु -उसाचे तुकडे ३)पूगम्- टरफलासह सुपारी ४)नारिंग - नारिंग ५)जंबीर -इडलींबू/महाळुंग ६)बीजपूरक -फळ/महाळुंग ७)उत्तती -खारीक ८)नारिकेल -नारळ ९)दाडिम - डाळिंब (संदर्भ - व्रतोद्यापन चंद्रिका)

ग्रहधान्यानि

१ गोधूमाः सूर्य दैवत्याः सूर्यप्रीतिकराः सदा।
तस्मादेषां प्रदानेन समे सूर्यः प्रसीदतु।।१।।

२ तंडुलाश्च्चंद्र दैवत्याः चंद्रप्रीतिकरा शुभाः।
तस्मादेषां प्रदानेन समे चंद्रः प्रसीदतु।।२।।

३ आढका भौमदैवत्याः भौभ प्रीतिकराः शुभाः।
तस्मादेषां प्रदानेन समे भौमः प्रसीदतु।।३।।

४ मुद्गाश्च्च सौम्य दैवत्याः सौम्य प्रीतिकराः शुभाः।
तस्मादेषां प्रदानेने समे सौम्यः प्रसीदतु।।४।।

५ चणका गुरु दैवत्या गुरु प्रीतिकराः सदा।
तस्मादेषां प्रदानेन समे जीवः प्रसीदतु।।५।।

६ निष्पापाः शुक्रदैवत्या शुक्रप्रियकराः सदा। (पांढरे वाल)
तस्मादेषां प्रदानेन समे शुक्रः प्रसीदतु।।६।।

७ तिलाः काश्यप संभूताः तिलाः पापहराः शुभाः।
तिलदान प्रदानेन समे मंदः प्रसीदतु।।७।।

८ माषाश्च्च राहुदैवत्याः राहोः प्रीतिकराः शुभाः।
तस्मादेषां प्रदानेन समे राहुः प्रसीदतु।।८।।

९ कुळिथ्थाः केतुदैवत्याः केतु प्रीतिकरा सदा।
तस्मादेषां प्रदानेन समे केतुः प्रसीदतु।।९।।

नवग्रहांसाठी हवनीय फळे - सूर्यादि क्रमाने -
द्राक्षेक्षुपूगनारिंग जंबीर बीजपूरकम्।
उत्तती नारिकेलं च दाडिमः क्रमशः फलम्।।

१)द्राक्ष २)इक्षु(उसाचे तुकडे) ३)पूगम् (टलफलासह सुपारी ४)नारिंग
५)जंबीर (इडलींबू/महाळुंग ६)बीजपूरक (फळ/महाळुंग) ७)उत्तती
(खरीक) ८)नारिकेल (नारळ) ९)दाडिम(डाळिंब)
(संदर्भ - व्रतोद्यापनचंद्रिका)

कार्य कोणत्या पध्दतीने करावे-
कर्तुः शास्त्रोक्तमार्गेण आचार्यस्याथवा पुनः।
कुर्यादग्निप्रणयनं हवनादि विधिस्तथा।।१।।

सुवर्ण धारण करण्याचे महत्व -

ओम् नतद्रक्षा ँ सि न पिशाचास्तरंति देवानामोजप्रथमज ँ ह्येतत्। यो बिभर्ति दाक्षायण ँ हिरण्य ँ स देवेषु कृणुते दीर्घमायु:स मनुष्येषु कृणुते दीर्घमायु: ।।

सोने (सुवर्ण) देवांचे श्रेष्ठ असे तेज असल्याने राक्षस व पिशाच्चे, सोने पाहून दूर पळून जातात, जी व्यक्ती अलंकाराच्या स्वरुपात सोने धारण करते ती दीर्घकाळ देवलोकात सुखाने राहाते. आणि पृथ्वीवर दीर्घायुषी होते.

अग्नीची प्रार्थना - नवैरे.
ओम् अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्रदातारं तारिष ऊर्जं नो धेहि व्दिपदे चतुष्पदे ।।
हे अग्निनारायणा, आम्हाला रोगनाशक, बलवर्धक, अन्न दे. अन्नदात्याची सर्व प्रकारे वृध्दि कर. आमचे सेवक व पशु सशक्त बनून त्यांचे कल्याण कर.

सुवर्ण धारण करण्याचे महत्व -
ओम् नतद्रक्षाँ सि न पिशाचास्तरंति देवानामोजप्रथमजँ ह्येतत्। यो बिभर्ति दाक्षायणँ हिरण्यँ स देवेषु कृणुते दीर्घमायुःस मनुष्येषु कृणुते दीर्घमायुः ।।
सोने (सुवर्ण) देवांचे श्रेष्ठ असे तेज असल्याने राक्षस व पिशाच्चे, सोने पाहून दूर पळून जातात, जी व्यक्ती अलंकाराच्या स्वरुपात सोने धारण करते ती दीर्घकाळ देवलोकात सुखाने राहाते. आणि पृथ्वीवर दीर्घायुषी होते.

यज्ञ संदर्भात अग्नीचे सवरुप -
ओम् चत्वारि शृंगा त्रयो अस्य पादा व्दे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बध्दो वृषभो रोरवीति महो देवो मर्त्याँ अविवेश।

मंत्रात आलेल्या संख्यांचे यज्ञसंबंधित अर्थ.
चत्वारि शृंगा -चार शिंगे, ब्रह्मा, उद्गाता, होता व अध्वर्यु.
त्रयः पादाः - तीन पाय, ऋग्वेद, यजुर्वेद, सामवेद.
व्दे शीर्षे - दोन मस्तके, हविर्धान, प्रवर्ग्य.
त्रिधा बध्दः- तीन बंधन, प्रातः सवन, मध्यंदिन सवन, तृतीय सव.

सात संख्येचा महिमा दाखवणारा मंत्र
ओम् सप्त ते अग्ने समिधः, सप्त जिव्हाः ,सप्त ऋषयः ,सप्त धाम, प्रियाणि। सप्त होत्राः,सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन।
सात समधि - सात प्राण

सात जिव्हा - सात ज्वाला, काली, कराली, मनोजवा, विलोहिता, सधूम्रवर्णा, स्फुल्लिंगिनी, व विश्वरुचि, (मुंडकोपनिषद्)

सात ऋषि- मरीचि, अत्रि, अंगिरा, फुलस्त्य, पुलह, क्रतु, वसिष्ठ.

सात स्थान - आहवनीय, गार्हपत्य, दक्षिणाग्नि, सभ्य, आवसथ्य, प्राजाहित, आणि आग्नीध्री (सोमयागातील स्थान)

सात ऋत्विज- होता, प्रशास्ता, ब्राह्मणाच्छंशी, पोता, नेष्टा, आग्नीध्र आणि अच्छावाक्.

यज्ञाचे सात प्रकार - अग्निष्टोम, अत्यग्निष्टोम, उक्थ, षोडशी, अतिरात्र, आप्तोर्याम, आणि वाजपेय.

सात योनि - सात चिति. (श. ब्रा. ९।२।३।४४)

ऋषिवर्यांनी गाईच्या वासरांविषयी सांगितलेली वय सूचक नांवे

स्त्रीलिंगी		**पुल्लींगी**
कालवड	गाईचे वासरु -	गोऱ्हा
त्र्यवी -	दीड वर्षांचे वासरु.	त्र्यवी
दित्यौही -	दोन वर्षांचे वासरु.	दित्यवाद
पंचावी -	अडीच वर्षांचे वासरु.	पंचावि
त्रिवत्सा -	तीन वर्षांचे वासरु.	त्रिवत्सः
तुर्यौही -	साडेतीन वर्षांचे वासरु.	तुर्यवाट
पष्ठौही -	चार वर्षांचे वासरु.	पष्ठवाट
वशा -	वंध्या गाय.	---
------	वीर्यसेचनास योग्य गोऱ्हा	उक्षा
वेहत् -	गर्भघातिनी गाय.	
	तरुण बैल	ऋषभ
धेनु -	नवप्रसूता गाय.	

गाडी/नांगर /मोट ओढू शकणारा समर्थ बैल अनड्वाह

।।अथ चतुर्दशयमदेवतानां आवाहन मंत्राः।।

१ यमं - यमस्त्वं यमुनाभ्राता यमदंडधरः सदा।
पापिनां पापनाशार्थं स्थाने चात्र स्थिरो भव।।१।।

अस्मिन् पूगीफले यमं आवाहयामि, स्थापयामि, पूजयामि।
एवं प्रकारेण सर्वत्र आवाहनं कर्तव्यम्।

२ धर्मराजं - धर्माधर्मविचारज्ञो धर्ममार्गं प्रवर्तकः।
अतोऽसि धर्मराजस्त्वं स्थाने चात्र स्थिरो भव।।२।।

अस्मिन् पूगीफले धर्मराजं आवाहयामि, इत्यादि०

३ मृत्युं - स्थावराजंगमानां त्वं कल्पे नाशकरः सदा।
अतो मृत्युरितिख्यातः स्थाने चात्र स्थिरो भव।।३।।

अस्मिन् पूगीफले मृत्युं आवाहयामि, इत्यादि०

४ अंतकं - महामहिषमारूढो दंडपाणिर्महाबलः।
कृष्णाभः कृष्णवर्णस्त्वं स्थाने चात्र स्थिरो भव।।४।।

अस्मिन् पूगीफले अंतकं आवाहयामि, इत्यादि०

५ वैवस्वतं - सूर्यवीर्यात् समुत्पन्नो वैवस्वतो महाबलः।
प्रेतानां पापनाशाय स्थानेऽस्मिन् स्थिरो भव।।५।।

अस्मिन् पूगीफले वैवस्वतं आवाहयामि, इत्यादि०

६ कालं - कालाय कालरुपाय कालांजनसमप्रभो।
दक्षिणस्यां कृतावासः कालदेव नमोऽस्तुते।।६।।

अस्मिन् पूगीफले कालं आवाहयामि, इत्यादि०

७ सर्वभूतक्षयं - कल्पे कल्पे च भूतानां क्षयकर्ता त्वमेव च।
सर्वभूतक्षयो नाम स्थाने चात्र स्थिरो भव।।७।।

अस्मिन् पूगीफले सर्वभूतक्षयं आवाहयामि, इत्यादि०

८ औदुंबरं - औदुंबर महादेव महाबुद्धिविशारद।
प्रेतमुक्तिप्रदानाय स्थानेऽस्मिन् सुस्थिरो भव।।८।।

अस्मिन् पूगीफले औदुंबरं आवाहयामि, इत्यादि०

९ दघ्नं - दघ्नंदेव नमस्तेऽस्तु लोकानां भीतनाशकृत्।
प्रेतयोनिविनाशाय स्थाने चात्र स्थिरो भव।।९।।

अस्मिन् पूगीफले अघ्नं आवाहयामि, इत्यादि०

१० नीलं - नीलगुणविशिष्टो हि नीलनाम्ना प्रकीर्त्यति।
प्रेतनीलत्वनाशाय स्थाने चात्र स्थिरो भव।।१०।।

अस्मिन् पूगीफले नीलं आवाहयामि, इत्यादि०

११ परमेष्ठिनं -उत्कृष्टस्थनमाश्रित्य स्थितोऽसि परमेश्वर।
परमेष्ठिन्निति ख्यातः स्थाने चात्र स्थिरो भव।।११।।

अस्मिन् पूगीफले परमेष्ठिनं आवाहयामि, इत्यादि०

१२ वृकोदरं - वृकोदरो महाभीमो जगद्भीतिकरो भवान्।
प्रेतभीतिनिवृत्त्यर्थ स्थाने चात्र स्थिरो भव।।१२।।

अस्मिन् पूगीफले वृकोदरं आवाहयामि, इत्यादि०

१३ चित्रं - जगतामादिदेवेन जगच्चित्राय निर्मितः।
प्रेताकृतिविनाशाय स्थाने चात्र स्थिरो भव।।१३।।

अस्मिन् पूगीफले चित्रं आवाहयामि, इत्यादि०

१४ चित्रगुप्तं - नानाविधानां वित्राणां गोपनाय त्वमर्हसि।
चित्रगुप्तेति विख्यातः स्थाने चात्र स्थिरो भव।।१४।।

अस्मिन् पूगीफले चित्रगुप्तं आवाहयामि, इत्यादि०

वरील मंत्रांनी यमादी १४ देवतांचे आवाहन करुन "यमाद्यावाहितदेवताभ्यो नमः'' इति मंत्रेण षोडशोपचारैः पूजयेत्। त्रिपाद व पंचकशांतीचे वेळी यमादि १४ देवतांची पूजा करण्याची पध्दत आहे., त्या वेळी हे वरील मंत्र उपयोगात आणावेत.

संदर्भ - "श्राध्दकौमुदी''

।।अथ अग्न्युत्तारणपूर्वक प्राणप्रतिष्ठा।। पुराणोक्त।।

आचमन करुन संकल्प करावा ---

अद्यपूर्वोच्चरित ० ----- शुभपुण्यतिथौ, अस्या: मूर्ते: अंग प्रत्यंगसंधि समुत्पन्न, घर्षण, ताडन, तापन, टंकाघात, अग्नितापादि, जनित दोषपरिहारार्थं, अग्न्युत्तारण पूर्वक, देवत्व संनिधानेन, पूजार्हता सिध्द्यर्थं प्राणप्रतिष्ठां करिष्ये।

मूर्तीला तूप लावावे. नंतर पाण्याची धार धरावी, व खालील मंत्र ३ वेळा म्हणावा.

(घृतेन मूर्तिं अभ्यज्य, उपरि जलधारां कुर्यात्, तत्र मंत्र:)

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजय:।
अग्नेरुत्तारणर्थाय, मूर्तीनां शुध्दिहेतवे।। (३ वेळा म्हणावा)

अस्य श्री प्राणप्रतिष्ठा मंत्रस्य, ब्रह्माविष्णुमहेश्वराऋषय: ऋग्यजु: सामाथर्वाणि छंदांसि, जगत् सृष्ठिकारिणी, प्राणशक्ति: देवता, सर्वसौख्यकारिणी देवता, अस्या: मूर्ते:, प्राणजीवेंद्रियसिध्द्यै, जपाम्यहम्। यदिक्षांताक्षरमनुमंत्रिता:, प्राणवायव:।

नमस्कार करुन म्हणावे ---

इह तिष्ठंतु भूयोऽपि तेनमंत्रेण मंत्रिता:।
जीवो वसतु पूजांतं, पुनरुच्चारमंत्रिता:।।
जीवो वासतु पूजांतं, पुनरुच्चारमंत्रितम्।
चतुर्विंशति तत्वानां, वृंदंतिष्ठतु वै चिरम्।।

अस्या: मूर्ते:, सर्वेंद्रियाणि, वाङ्मनस्त्वक्, चक्षुश्रोत्र, जिह्वा, घ्राण, पाणिपाद, पायूपस्थानि, इहैव आगत्य, सुखं, चिरं तिष्ठंतु नम:।

तत: गर्भाधानादि, षोडशसंस्कार सिध्द्यर्थं, षोडशप्रणवावृत्तिंकरिष्ये।

"ह्रीं" इति षोडशवारं जपेत्। ("ह्रीं"असे १६ वेळा म्हणावे)

अनेन षोडशसंस्कार: संपद्यंताम्। (असे म्हणून उदक सोडावे.)

मूर्तीच्या हृदयाला दूर्वाग्रांचा स्पर्श करुन म्हणावे.
अस्यै: प्राणा: प्रतिष्ठंतु, अस्यै प्राणा: क्षरंतु च।
अस्यै: देवत्वमर्चायै, मामहेति च कश्चन।।
दूर्वेने देवाच्या डोळयांना तूप लावावे. आणि म्हणावे.
ज्ञानतेजोमये नेत्रे, जगन्मंगलकारके।
उन्मीलिते मया भक्त्या, मांगल्यं परिवर्धताम्।।
प्राणशक्तीला नमस्कार करावा. म्हणावे.
सच्चिदानंदरुपाया, सर्वचैतन्यदायिनी।
प्राणरुपापराशक्ति:, सर्वान् रक्षतु संततम्।।
"प्राणशक्त्यै: नम:" असे म्हणून गंध, पुष्प, धूप, दीप, नैवेद्यं समर्पयामि, नमस्करोमि, "त्रैलोक्यस्य मंगलं कुरु" इति प्रार्थयेत्।
अनेन मूर्ते: प्राणप्रतिष्ठाख्येन कर्मणा, प्राणशक्ति: प्रीयताम्।

-- इति प्राणप्रतिष्ठा --

संदर्भ - १ व्रतोद्यापन चंद्रिका २ कृत्य संग्रह